पथ्यानागरसाधितः। गोमूत्रगुग्गुलुयुतः। क्वाथः शोफोदरापहः॥ पुष्करोत्थ

तकं क्वाथं यवक्षारकणायुतं। पिबेत्प्रातर्यकृत्प्लीहगुल्मोदरनिवृत्तये॥ पुनर्नवा

दारुनिशानिशाशुंठीहरीतकी। गुडूचीचित्रकं नागी देवदारु ... स्तं॥ पा

णिपादोदरमुख शोफं निवारयेत्॥ फलत्रिकोद्भवं क्वाथं गोमूत्रेण पाचय

येत्॥ वातश्लेष्माकृतं हन्ति शोथं ... रास्नामृता वला यष्टी ... २८

इतिस्नादगुल्मोदरो॥

अग्निमंथद्वयं शिग्रुद्वयं पंचवृहतीद्वयं॥ सैरेयकत्रयं सर्वा मेषशृंगी किराततः॥९

स्मृतः॥ एरंडतैलसंयुक्तो वृद्धिमांत्रभवां जयेत्॥ कांचनारत्वचं क्वाथ सुंठीचूर्णेन ना॥
शयेत् गंडमालां तथा क्वाथः कैडर्येण वरुणस्य च॥ शासोट वल्कलक्वाथ गो
मूत्रेण युतं पिवेत्॥ श्लीपदानां विनाशाय मेदोदोषनिवृत्तये॥ पुनर्नवा वरुण
योः क्वाथोंतविद्रधिं जयेत्॥ तथा शिग्रुरवः क्वाथो हिंगुसैंधवसंयुतः॥ वरुणादिग
ण क्वाथम पक्वे पक्वविद्रधौ॥ ऊषकादिरजोयुक्तं पिवेत्समनहेतवे॥ सयथा॥ व
रुणो वकपुष्पश्च बिल्वापामार्गचित्रकाः॥ अजशृंगी द्विविंवीच करंजश्च शतावरी॥
वरुणादिगणक्वाथः कफमेदोहरः स्मृतः॥ हंति गुल्मं शिरःशूलं तथाभ्यंतरविद्रधी
न्॥ वरुणादिः॥ ॥ खदिर त्रिफला क्वाथो महिषीघृतसंयुतः॥ विडंगचूर्णसंयुक्तो
भगंदरविनाशनः॥ पटोलत्रिफलानिंबाकिराततखदिराशनैः॥ क्वाथः पीतो जये
त्सर्वानुपदंशान्समगुग्गुलुः॥ ॥ अमृतैरंडवासानां क्वाथ एरंडतैलयुक्॥ पीतः
सर्वांगसंचारि वातरक्तं जयेद्ध्रुवं॥ पटोलं त्रिफला तिक्ता गुडूची च शतावरी॥ एतत्क्वा॥

योजयेत्पीतो वातास्रं ह्याय संयुतं ॥ पटोलादि ॥ ॥ क्वाथो वल्गुजचूर्णाढ्यो धात्रीखादि
३० रसारयो ॥ जयेत्सुसीलितो नित्यं श्वित्रं पथ्याशिनां नृणां ॥ वल्गुजादि ॥ मंजिष्ठात्रि
फलातिक्ता वचा दारु निशामृता ॥ निंबश्चैषां कृतः क्वाथो वातरक्तविनाशनः ॥ ॥
पामा कपालिका कुष्टरक्तमंडलजिन्मतः ॥ लघुमंजिष्ठादि ॥ ॥ मंजिष्ठामुस्तकु
टजागुडूचीकुष्टनागरैः ॥ भार्गी क्षुद्रा वचा निंब निशाद्वय फलत्रिकैः ॥ पटोल कटु
का मूर्वा विडंगासन चित्रकैः ॥ शतावरी त्रायमाण कृष्णेंद्रजव वासकैः ॥ भृंगराज म
हादारु पाठा खदिर चंदनैः ॥ त्रिवृद्वरुण कैरात बाकुची कृतमालकैः ॥ शाखोटक म
हानिंब करंजाति विषा जलैः ॥ इंद्रवारुणिकानंता सारिवा पर्पटैः समैः ॥ एभिः ॥
कृतं पिबेत्क्वाथं कणागुग्गुलुसंयुतं ॥ अष्टादशसु कुष्टेषु वातरक्तार्दितेषु च ॥ उदुंब
रस्लीपदे चैव प्रसुप्तौ पक्षघातके ॥ मेदोदोषे नेत्ररोगे मंजिष्ठादिः प्रशस्यते ॥ मंजिष्ठा ॥
दि ॥ ॥ पथ्याक्षधात्रीत्वक्निंबैर्निशानिंबामृतायुतैः ॥ कृतः क्वाथः षडंगोयं ॥ सगुडः शीर्ष ३०

षेविनीतकशिवाधात्रीपटोलारिष्टवासकैः क्काथो गुग्गुलुनापेयः सर्वस्ताक्षिरोगनुत्पिल्लं ...ग्रं ... रोगादी ...

सूल हा॥ दशारवकर्मश्रुताजनितयाः क्षिरसोरुजां। सूर्यावर्त्तं शंखकं च दंतपातं च तद्रुजं नक्तांध्यं पटलं शुक्रं च कृः पीडां व्यपोहति॥ पथ्यादिः॥ ॥वासा किरातमुस्ता चीरत्नाचंदनचित्रकैः। त्रिनिंवनिंवकटुका पटोलत्रिफलां वुदैः॥ यवकालिंगकुटजैः क्काथः सर्वाक्षिरोगहृत्॥ वैष्टर्यपीनसंस्वासं नासयेदुरसक्षतं॥ वासादिः॥ ॥अमृतात्रिफला क्काथः पिप्पलीचूर्णसंयुतः॥ सक्षौद्रः सीलितोनित्यं सर्वनेत्रव्यथां जयेत्॥ अमृतादिः॥ अश्वत्थोदुंबरप्लक्षवटवेतसजः स्मृतः॥ व्रणशोथोपदंशानां नाशनाः क्षालने स्मृताः॥ इति क्काथः॥ अथ प्रमथ्या॥ ॥१ मथ्या प्रोच्यते द्रव्यपलात्कल्कीकृतात्ततः॥ तोयेष्टगुणिते तस्य पानमाहुः पलद्वयं॥ मथ्या॥ मुस्तकेंद्रयवैः सिद्धा प्रमथ्या द्विपत्त्रे॥ मिता॥ सुसीता मधुसंयुक्तारक्तातीसारनाशनी॥ १॥ अथ पायवागूः॥ साध्यं चतुः पलं द्रव्यं। चतुः षष्टिपलेंवुनि तत्क्काथेनार्द्धशिष्टेन यवागूंसाधयेत्ततो॥ सयथा॥ आम्रास्रातकजंवूत्वक्कषायैर्विपचेद्बुधः॥ य

पयोलवासक्कारिष्टगुडूचीत्रिफलधोतंचनलंसप्तच्छदं चंदनं ... पयोलारिष्टाः ... सर्वनेत्र ... फ्लैमवसन्निपातकं ... रत्तप्रकं चसवो ... ॥५७

कुश्मारक:　　　　क्षीर:।

तंदलुमिः　　　　मेरूपारी

वायूंशालिस्त्रिर्युक्तांत्वांतु कार्याग्रहिणीं जयेत्॥ अथयूष:॥ कल्कद्रव्यपलंशुंठीपि
३। पली सार्द्धकार्षिकं।वारि प्रस्थेन विपचेत्स द्रवो यूषउच्यते॥ सयथा। कुलत्थय
वकोलैश्च मुद्गैर्मूलकशुंठकैः॥ शुंठीधान्यकयुक्तैश्च यूषः श्लेष्मानिलापहः॥ सप्त
मुष्टिक इत्येष सन्निपातहरो नृणां जयेत्॥ आमवातहरः कंठहृद्वक्त्राणां विशोधन:
सैन्धवो सप्तमुष्टिकयूषः॥ अथपानादिकल्पना॥ द्रव्याद्द्रव्यापलं [illegible] सा [illegible] चतुःषष्टि
पलेजले। अर्द्धावशिष्टंचतद्देयं पानेलाजादिसंविधौ उसीरपर्पटोदीच्यमुस्तानागरचं
दनैः जलं सृतं हिमं पेयं पिपासाज्वरनाशनं॥ ॥अथउष्णोदकविधि॥ अष्टमेनां
शशेषेण चतुर्थेनार्द्धकेन वा॥ अथवाक्कथनेनैव सिद्धमुष्णोदकं वदेत्॥ श्लेष्मा
मवातमेदोघ्नं वस्तिशोधनदीपनं॥ कासश्वासज्वरान्हंति पीतमुष्णोदकं निशि॥
॥अथक्षीरपाकविधिः॥ ॥क्षीरमष्टगुणंद्रव्यात्क्षीरान्नीरं चतुर्गुणं। क्षीरावशेषंतत्
पीतं शूलमामोद्भवं जयेत्॥४ अथअन्नप्रक्रिया॥ अथान्नप्रक्रियात्रैव शोच्यतेनातिवि २१

मंडः॥ विलेपी तर्पणी हृद्या मधुरा पित्तनाशनी॥ इति विलेपी॥ द्रवाधिका स्वल्पसिक्था
चतुर्दशगुणतोये

स्तरा॥ यवागूः षड्गुणजले सिद्धा स्यात्कृशरा घना॥ तंडुलैर्मुद्गमाषैश्च सितैर्वा साधिता॥
हिता॥ यवागूर्ग्राहिणी बल्या तर्पणी वातनाशिनी॥ इति यवागूः॥ ॥ अथ विलेपी
॥ विलेपी च घना सिक्थैः सिद्धा नीरे चतुर्गुणे॥ सिद्धा पेया बुधैः यूषः किंचिद्घ
नस्ततः॥ पेया लघुतरा ज्ञेया ग्राहिणी धातुपुष्टिका॥ यूषो बल्यस्ततः कंठ्यो लघुपा
को कफापहः॥ इति पेयायूषः॥ ॥ जले चतुर्दशगुणे तंदुलानां चतुःपलं॥ विपचेत्स्रा
वयेन्मंडं स तक्रो मधुरो लघुः॥ इति तक्रः॥ अथ मंडः॥ नीरे चतुर्दशगुणे सिद्धो मंड
स्त्वसिक्थकः॥ शुंठीसैंधवसंयुक्तः पाचनो दीपनः स्मृतः॥ इति शुद्धमंडः॥ धान्यत्रिक
टुसिंधूत्थैर्युक्तः स्तक्रेण योजितः॥ तक्रसर्पिर्हिंगुतैलात्यामसमंडोष्टगुणः स्मृतः॥ दी
पनः प्राणदो बस्तिशोधनो रक्तवर्द्धनः॥ ज्वरजित्सर्वदोषघ्नो मंडोष्टगुण उच्यते॥ सुभृ
कंडितैस्तथाभ्रष्टैः वाट्यामंडो यवैर्भवेत्॥ कफपित्तज्वरे कंठ्यो रक्तपित्तप्रसाधनः॥ इ
ति वाट्यामंडः॥ ॥ लाजैर्वा तंडुलैर्भ्रष्टैर्लाजामंडः प्रकीर्तितः॥ श्लेष्मपित्तहरो ग्राही॥

कुटे बावलर

अष्टगुण मंडः २

पिपासाज्वरजिन्मतः ॥ इति लाजमंडः ॥ इति श्रीदामोदरसूनोः शार्ङ्गधरविरचि-
तायां संहितायां चिकित्सास्थाने क्वाथादिकल्पनाध्यायः ॥ ८ ॥ ॥ अथ फांटक-
ल्पना ॥ क्षुण्णद्रव्यपले सम्यक् जलमुष्णं विनिक्षिपेत् ॥ मृत्पात्रे कुडवोन्मानं ततस्तु
श्रावयेत् पटात् ॥ स स्यात् चूर्णद्रवः फांटः तन्मानं द्विपलोन्मितं ॥ मधुश्वेतागुडादीं
श्च क्वाथवत् तत्र निक्षिपेत् ॥ स यथा ॥ मधूकपुष्पं मधुकं चंदनं सपरूषकं ॥ मृणा-
लं कमलं लोध्रं कंसारी नागकेशरं ॥ त्रिफला सारिवा द्राक्षा लाजाः कोष्णे जले क्षि-
पेत् ॥ सितामधुयुतः पेयः फांटोयं सौहिमोथवा ॥ वातपित्तज्वरं दाहं तृष्णां मू-
र्छामरतिं भ्रमं ॥ रक्तपित्तं मदं हन्यान्नात्र कार्या विचारणा ॥ इति मधूकपुष्पादिफां-
टः ॥ आम्रजंबूकिशलयैर्वटशुंगप्ररोहकैः ॥ उशीरेण कृतः फांटः सक्षौद्रो ज्वरना-
शनः ॥ पिपासाछर्दीतीसारान्मूर्छां जयति दुस्तरां ॥ आम्रादिफांटः ॥ ॥ मधूकपुष्प- ३२
कंसारीचंदनोशीरधान्यकैः ॥ द्राक्षया च कृतः फांटः शीतः शर्करया युतः ॥ तृष्णापि

नहस्रोतोदाहमूर्छास्रमार्जयेत्॥ लघुमधूकपुष्पादिफांटः॥ अथ मंथः॥ मंथो।
पि फांटः सेद्धव्या तेन चात्र च कथ्यते॥ स यथा॥ जले चतुःपले शीते क्षुण्णं द्रव्यपलं
क्षिपेत्॥ मृत्पात्रे मंथयेत्सम्यक् तस्माच्च द्विपलं पिबेत्॥ खर्जूरदाडिमद्राक्षातिंति-
डीकाम्लिकामलैः॥ सपरूषैः कृतो मंथः सर्वमद्यविकारनुत्॥ खर्जूरादिमंथः॥
॥ तोयद्युक्तामसूराणां सक्तवो दाडिमांत्तसः॥ मथिता वारयंत्याशु छर्द्दिं दोषत्रयो-
त्थितां॥ मसूरादिमंथः॥ ॥ लोडितैः शीतनीरेण सघृतैर्यवसक्तुभिः॥ नातिसांद्रो द्रवो मं-
थ तृष्णादाहास्रपित्तहा॥ सक्तुमंथः॥ ॥ इति श्रीदामोदरसूनोः शार्ङ्गधरविर-
चितायां संहितायां चिकित्सास्थाने फांटादिकल्पनाध्यायः॥ ॥ अथ हिमकल्पना॥
क्षुण्णं द्रव्यपलं सम्यक् षड्भिर्नीरपलैः प्लुतं॥ निशोषितं हिमं स स्यात्तथा शीतकषायक-
म्॥ तन्मानं फांटवज्ज्ञेयं सर्वत्रैवैष निश्चयः॥ स यथा॥ आम्रजंबूत्वक्ककुभं संचूर्णीकृत्य
जले क्षिपेत्॥ हिमं तस्य पिबेत्प्रातः सक्षौद्रं रक्तपित्तजित्॥ आम्रादिहिमः॥ मरिचं मधुक

धीचकाकोडुंवरिपल्लवं। नीलोत्पलं हिमस्तज्ज्ञः तृष्णाछर्द्दिनिवारणः॥ मरिचादिहि-
३२ मः॥ नीलोत्पलं वल्लकं द्राक्षा मधूकं मधुकं तथा। उसीरं पद्मकं चैव काश्मरीं च परूष-
कं॥ एतत्सीतकषायश्च वातपित्तज्वरं जयेत्॥ सप्रलापं भ्रमं छर्द्दिं मोहं तृष्णां च नि-
33 वारणः॥ नीलोत्पलादिहिमः॥ आम्रत्वचाहिमः पेयो जीर्णे ज्वरहरः स्मृतः। वासाया-
श्च हिमं कासरक्तपित्तज्वरान् जयेत्॥ आम्रत्वग्‌हिमो वासाहिमश्च। धातकीसशर्करः पेयो॥
हिमो धान्याकसंभवः। अंतर्दाहं तथा तृष्णां। जयेत्स्रोतोविशोधनः॥ धन्यादिहिमः॥
धान्यपाकधात्रीवासानां द्राक्षापर्पटयोर्हिमः। रक्तपित्तं ज्वरं दाहं तृष्णां सोषं च नाश-
येत्॥ धान्यपादिकहिमः॥ ॥इति श्रीदामोदरसूनोः शार्ङ्गधरविरचितायां संहिता-
यां चिकित्सास्थाने हिमकल्पनाध्यायः॥ ॥अथ कल्ककल्पना॥ द्रव्यमार्द्रं शिलापि-
ष्टं शुष्कं वा सजलं भवेत्। प्रक्षेपावापकल्कास्ते तन्मानं कर्षसंमितं॥१॥ कल्के म-
धुघृतं तैलं देयं द्विगुणमात्रया॥ सितागुडसमं दद्याद्द्रवा देयाश्चतुर्गुणाः॥ समयथा॥ ३२

तरद्ध्यायं चरद्ध्याममासात्र। ... ण:। पिवेद्धि ... दशादिनतो नथैवापर्वयेतो एतो

विंशदिनेनसिद्धं पिप्पलीवर्द्धमानकं। अनेनपांडुवातास्त्रि कासस्वाससविषज्वरा।

उदरार्शक्षयश्लेष्म वातनस्यंत्युशोथ ग्रह। पिप्पलीवर्द्धमानां। ... निवद्दत्ने। क

त्कोब्रणसोथ्य ... पण:। ... कुष्टानि पित्त श्लेष्म ... मीजयेत्। ... निव

जलावकत्को ... घृसीनासनः ... ततः। ... त्कोरसोन ... तैलेन ... ततः। वा

तरोगान् जयेत्तीव्रान् विषमज्वरनासनः। पक्कंदरसोनं स्पंगुटिका। निस्तुषीकृतं।

कोटयेच्चाचमध्यस्थ हरीकुर्यात्तदंकुरं। तद्गंधनाशायरा त्रौतक्रे विनिक्षिप।

त्। अपनीयचतन्मध्यात् सिक्तायां पीषयेत्ततः। तन्मध्ये पंचमासेन चूर्णमेषां वि

निक्षिपेत्। सौवर्चलं यवानीजं ... हिंगु सैंधवं। कटुत्रिकं ... गानि चू

र्णयेत्। एकीकृत्यततः सर्वं कल्पकंधप्रमाणतः। यदिच्छेन्निवर्तायैसौ ... दोष

व्यपेक्षया॥ अनुपानंततः कुर्यादेरंडस्नेतमन्वहं। सर्वांगैकांगजं वातमर्दितं पाच।

इतिकल्कः।

हर्बा॥

तंत्रकं। अपस्मारं तथोन्मादं मूत्रस्तंभं च गृध्रसी। उरः पृष्टः कटीपार्श्वकुक्षिपीडां च दु
र्मीजयेत्॥ अजीर्णमातपं रोषमग्निं नीरं पयो गुडं। रसोनमश्नन् पुरुषस्त्यजेदे
तन्निरंतरं। मद्यं मांसं तथाम्लं च रसं सेवेत नित्यशः॥ इति रसोनकल्कः॥ पिप्प
३४॥ ली पिप्पलीमूलं तु भल्लातकफलानि च। एतत्कल्कः ससक्षौद्रः कफरक्तं ज्वलनि — से=२
वारणः॥ विष्णुक्रांता जटाकल्कः सिता क्षौद्रघृतैर्युतः। परिणामसमानं वेष्टशूलं न — परिणामसमानवेष्टशूल=६
प्रदरः शयेत् स सप्ताहं दिने॥ शुंठीगुडतिलैः कल्कं दुग्धेन सह योजयेत्। आमवातस्य नश्य
अपामार्गमूलबीजानां=५ ति कल्कस्तंडुलवारिणा॥ पीतो रक्तार्शसां नाशं कुरुते नात्र संशयः। बदरीमूल
लकल्केन तिलकल्केन योजितः। मधुक्षीरघृतैः कुर्याद्रक्तातीसारनाशनं॥ वृ
षभाद्रकरसैः पिष्टं नार्हकिपदीं पिबेत्। रक्तक्षयमुरः पीतिं लयरोगं न लाजायां
त्या तंडुलीजटाकल्कः सक्षौद्रः सरसांजनः। तंडुलोदकसंपीतो रक्तप्रदरनाश
नः॥ अंकोलमूलकल्कश्च ससैंधवस्तंडुलांबुना। अतीसारहरः प्रोक्तः सत्त्वपार्श्वविषहृ — २८

अंकोल प.२

श्री लाकृचीर पत्रजोचाविक १ ५४

येदारोचकं सामंमेहगुल्मागलामयात्॥ ऊषणं॥ पिप्पली च महाविश्वाह्वा पिप्प
लीमूलचित्रकैः। पंचकोलमिति ख्यातं रुच्यं पाचनदीपनं॥ आनाहप्लीहगु
ल्मघ्नं शूलश्लेष्मोदरापहं॥ पंचकोलं॥ त्रिगंधमेलात्वक्पत्रैश्चातुर्यातं सकेश
रैः। त्रिगंधं च चातुर्यातं रूक्षौष्णं लघु पित्तकृत्॥ वर्ण्यं रुचिकरं तीक्ष्णं विषश्लेष्मा
मयापहं॥ त्रिगंधचातुर्यातकं॥ काकोली क्षीरकाकोली जीवकर्षभकौ तथा॥
मेदा महामेदा जीवंती मधुकं तथा॥ ... मुद्गपर्णी माषपर्णी जीवनीयोगण
स्त्वयं। जीवनीयोगणश्चादुर्गर्भसंधानकृद्गुरुः स्तन्यकृद्बृंहणो वृष्यः स्निग्धः शी
तः तृष्णापहः॥ रक्तपित्तहरः शोषज्वरदाहानिलापहः॥ इति जीवनीयगणः॥
द्वे मेदे द्वे च काकोल्यौ जीवकर्षभकौ तथा॥ ऋद्धिर्वृद्धिश्चैतैः सर्वैरष्टवर्ग उदाहृतः॥ अ
ष्टवर्गो बुधैः प्रोक्तो जीवनीयसमो गुणैः॥ इति अष्टकवर्गः॥ ॥सिंधुसौवर्चलं चैव
विडं सामुद्रिकं गडं। एकद्वित्रिचतुःपंचालवणानि क्रमाद्विदुः॥ तेषु मुख्यं सैंधवं स्या

इलायची दाल चीनी तमाल पत्र गंधः। नाग केसर सहितो चतु र्जातसंज्ञः ५

तृष्णाः कुरुचवो... कोरः ५

क्षारः

समाः

दन्तुत्के[illegible]योयएत्। सैंधवं[illegible]रोमकांतं [illegible]यंतन वर्णपंचकं। मधुरं[illegible]विमूत्रं

स्निग्धं सूक्ष्मं वातापहं। वीर्योष्णं दीपनं तीक्ष्णं कफपित्त विवर्द्धनं॥ इति लवणपंचकं॥

क्षारः इतिलवणपंचकं॥ स्वर्जिकायावशूकश्च क्षारयुग्मं मुदाहृतं। ज्ञेयो वह्निसमो क्षारो स्वर्जिकायावशूकजो। क्षारा सान्येपि गुल्मार्शोग्रहणीरुक्प्लिहदः। सकृत्पाचना क्रिमिपुंस्त्वघ्नाः शर्कराश्मरि नाशनाः॥ इति क्षारः॥ त्रिफलार्जुनी युग्मं कंटकारीद्वयं सटी। त्वक् दुग्रंथिकं मूर्वा गुडूची धन्वयासकः॥ कटुकापर्पटामुस्तं त्रायमाणं च वाल्कं। निंबपुष्करमूलं च मधुयष्टी च वत्सकं। जवानी द्विजवा[illegible]शिग्रुवीजं सुराह्वजं। वचाच्चव्यं पद्मकोशीर चंदनातिविषा बलाः। शालिपर्णी पृश्निपर्णी विडंगं तगरं तथा। चित्रकोदेवकाष्ठं च चव्यं पत्रं पटोलजं॥ जीवकर्षभको चैव लवंगं वंशलोचना। पुंडरीकं च काकोली॥ पत्रकं जातिपत्रकं॥ तालीसपत्रं च तथा समभागानि चूर्णयेत्। सर्वचूर्णस्य चार्द्धांशं कैरातं प्रक्षिपेत्सुधीः॥ एतत्सुदर्शनं नाम। चू ३८

रससलसह
कटूस
वायविडंग
लौंग ३

३८
पिपलामूल
कटूल
कमलगट्टा
काकडासिंगी
काकोली

चिरायता

ष्णादोषत्रयापहं। ज्वरांश्च निखिलान्हन्यान्नात्र कार्या विचारणा। पृथग्द्वंद्वागंतु-
जांश्च धातुस्थान्विषमज्वरान्। सन्निपातोद्भवांश्चापि मानसानपि नाशयेत्। शीतज्व-
रैकाहिकादीन्मोहतंद्राभ्रमं तृषां। श्वासं कासं च पांडुरोगं हृद्रोगं हंति कामलां त्रि- सदीरा
कपृष्ठकटीजानुपार्श्वशूलनिवारणं। शीतांबुना पिबेद्धीमान् सर्वज्वरनिवर्त्त-
नं। सुदर्शनं यथा चक्रं दानवानां विनाशनं। तद्वज्ज्वराणां सर्वेषामिदं चूर्णं प्र-
णाशनं॥ इति सुदर्शन चूर्णं। श्वासकासज्वरहरा त्रिफला पिप्पलीयुता। चूर्णि-
ता मधुना लीढा सैंधवेन च पाचिनी दीपिनी। कट्फलं पुष्करं तिक्ता सटी शृंगी चूर्णो ष्क-
रं। चूर्णमेषां च मधुना शृंगवेररसेन वा। लिहेद्धरेद्वमनं कासश्वासारुचीर्जयेत्॥
पिप्पला वायुमूर्द्ध्वं तथा शूलं क्षयं चैव कफोद्भवं। इति कट्फलादि चूर्णं। शृंगी प्रतिविषा
कृष्णा चूर्णितं मधुना लिहेत्। शिशूनां कासश्वासज्वरच्छर्दिशांत्यै बालानां विषा। शृं-
ग्यादिचूर्णं। शुंठी प्रतिविषा हिंगु मुस्ता कुटज चित्रकैः। चूर्णमुष्णांबुना पीतमाम-

कटुफलं बुष्करं शृंगी व्योषं जो सम्बकार्यदीरस्ल शग लीढं तं चैव तर्धिमधुनेसि रुत्ले स्यये त एर्वल्ले हिका हंति
सन्निपातसुदारुणां हृद्वाश्वास ज्वकास चयकरोगनदारुणं। इत स्थात कफोद्रेको कर्णमार्द्रक ज्वरसौ कुत कुदप

ती सौं र स्वाद्यानं ॥ पुती स ॥ हरीतकी पृति विषा सिंधु सोवर्चलं वचा ॥ हिंगु चेति कथं

चूर्णं नेष्ट्रिमेन्वर संतथा ॥ धीतकी चूर्णयित्वा गुडानल्पं पाययेत् सुधीः सर्वाति सा

र समनं निरूपणुद्धि अवाहि कां ॥ तद्धुगगा हरिनाम चूर्णं सथा हकं परं ॥ नद्धुगंगा ध

र चूर्णं ॥ मुस्तारलुकसुंठी सिधतिकी लोध्र मो लके ः चित्वमोचरस ... चप

तें द्रयववत्सके ॥ आम्र बीजंप्रति विषा लज्जा लूरिति चूर्नितैः दौ ३ ॥ डुलपानी

यपीतैर्यातिप्रवाहिका ॥ सर्वाती सारयहणी ... मयाति वेगतः ॥ हृद्रुगंगाधरं

चूर्णं सरिद्वेगोपि बंधकं ॥ दकगंगाधरस्यूर्णं ॥ तक्रेण यः पिबेन्नित्यं सर्वमीसारिनासं

सर्वा ॥ चित्रं सौवर्चलं पेतं ग्रहणी तस्पानं रूपाति उदर ... मदाग्नि गुल्मा शोनिा ...

मं सवेत ॥ मरि चाद्यं चूर्णं ॥ ॥ श्रेष्ठो ... कपिलं स्य चट्र ना गाः ... राम ता ... मरि च

जीरकं धान्यं ग्रंथिकं चव्य कंतथा ॥ सौवर्चलं यवानी च चातुर्यातं सचित्रकं ॥ नाग

रंचैकनागा सुः श्रत्ये कं सूक्ष्म चूर्नित ॥ कपित्थाष्टकसंज्ञं स्याचूर्णमेतद्हला मयान् ॥

३ दाडिमं तिं तिडीकं च श्रीफलं धातकीतृष्णा ... अजमोदा च पिप्पल्यः ... त्वामा ...

... धातु ... इलायची ॥ तज ॥ तमालपत्र ॥ नागकेसर

२ इलायची । दालचीनी पत्रज २

पंडु अतीसारं क्षयं गुल्मं ग्रहणीं च व्यपोहति ॥ कपित्थाष्टकचूर्णं ॥ दाडिमाद्विपलो ग्रा॥
ह्यो खंडाद्दाष्टपलानि च ॥ त्रिगंधस्य पलं चैकं ... कस्य तु पलत्रयं ॥ एतदेकीकृतं सर्वं
चूर्णं स्याद्दाडिमाष्टकं ॥ रुचिकृद्दीपनं कंठ्यं ग्राहि ... कासापहं ॥ दाडिमाष्टकं ॥ ॥
दाडिमस्य पलान्यष्टौ शर्करायाः पलाष्टकं ॥ पिप्पली पिप्पलीमूलं जवानी मरिचं तथा ॥
॥ धान्यकं जीरकं सुंठी प्रत्येकं पलसंमितं ॥ कर्षमात्रा तु गाक्षीरी त्वक्पत्रैलास्त्वकेश
रं ॥ प्रत्येकं कोलमात्राः स्युः स्तच्चूर्णं दाडिमाष्टकं ॥ अतीसारं क्षयं गुल्मं ग्रहणीं च गल
इलायची ग्रहं ॥ मंदाग्नीं पीनसं कासं ॥ चूर्णमेतद्व्यपोहति ॥ इति दाडिमाष्टकं ॥ ॥ लवंगं सुद्ध
कर्पूरमेला त्वङ्नागकेशरं ॥ जातीफलं मुशीरं च नागरं कृस्नजीरकं ॥ कृष्णागुरु तु नागकेसर
खंड २२ गाक्षीरी मांसी नीलोत्पलं कणा ॥ चंदनं तगरं वालं कंकोलं चेति चूर्णयेत् ॥ समस्त
ानि सर्वाणि सूक्ष्मत्योर्द्धं सिता तत्र वै ॥ लवंगादिमिदं चूर्णं राजार्हं वह्निदीपनं ॥ मारिचं कोल
रोचनं तर्पणं हृद्यं त्रिदोषघ्नं बलप्रदं ॥ हृद्रोगं कंठरोगं च कासं हिक्कां च पीनसं ॥ य

वैद्य ।

२ मत्रेऽजन २

दमाणं तमकं स्वासमती सारमुरःक्षतं ॥ प्रमेहारुचिगुल्मादीन् ग्रहणीनाशयेद्द
णं ॥ लवंगादिचूर्णं ॥ जातीफललवंगेलापत्रत्वङ्नागकेशरैः ॥ कर्पूरचंदनाभि
त्वेचं त्वक्क्षीरीतगरामरैः ॥ तालीसं पिप्पलीपथ्यास्थूलजीरकचित्रकैः ॥ शुंठी
विडंगमरिचैः समानागविचूर्णितैः ॥ यावंत्येतानि सर्वाणि कुर्यात्सर्गंबतावती
सर्वचूर्णसमादेयाः शर्कराचतिषग्वरैः ॥ कर्षमात्रं ततः खादेन्मधुनाल्पावितं सुधीः ॥
अस्याभ्यासाद्वह्निदीपकास्वाशरुचिश्र्या ॥ वातपित्तप्रतिश्यायाः प्रशमं यांति वे
गतः ॥ ॥ जातीफलादिचूर्णं ॥ ॥ मरिचं नागपुष्पाणि तालीसं त्वगणानि चाप्रत्येकमे
कल्पागस्पुः पिप्पलीमूलचित्रकैः ॥ [illegible] त्रितिशुंठीके चजीरकं धूयनागिकं ॥ सर्वौ
षधचतुर्थांशं दाडिमस्याफलं भवेत् ॥ द्वे [illegible] नि पिष्टेन पश्चात्सितं दद्यादर्द्धमात्रया ॥ महा
खांडवसंज्ञस्याचूर्नमेतत्सुसेवितं ॥ अग्निदीपकरं हृद्यं कासातीसारनाशनं ॥ हृद्रोगं
कंठजठरमुखरोगप्रणाशनं ॥ विषूचिकांतराध्मानं मत्रेगुल्मकृमीनपि ॥ छर्दिपंच

कालजीती = धान्यादन्नचेतसोविम्बंजडे लावरारोच
गअमेप्रजलुधरः प्रत्येकं स्याल्लिनागिकाः
मोच

अमालवगोदे कीऽ शतपुष्पी गंधिका। अजमोजा शारीधान्य बिडंग सैंधल
जीरकं हिंगु पौष्कर मूलं २२

विधं स्वासं चूर्णमेतद्व्यपोहति ॥ भल्लातकादिचूर्णं ॥ ॥ चित्रकस्त्रिफलाव्योषं जीरकं हपुषा ।
वचा अजमानी पिप्पलीमूलं दारौ लवणपंचकं ॥ कुष्ठं चेति समांसानि विसर्पो लोस्पुद्धिनागि
का ॥ त्रय शौ सागा विज्ञेया दं मात्रा मात्रयं न चेत् ॥ चतुर्भागा सौ तलस्य । त्स बो त्पी कत्र चूर्न
येत् ॥ पाचनं स्नेहना दोष्ण स्निग्ध को ष्ट स्य रोगिणः । दद्या चूर्णं विरेचाय सर्वरोग प्रणो
शनं । हृद्रोगे पांडुरोगे च का शेष्वासे भगंदरे । मंदाग्नौ च ज्वरे कोष्टे ग्रहस्पां च गलग्रहे । द
द्याच्चु कुनु पानेन तथा धान्ये सुरादिभिः । गुल्मो बदरनीरेण विड्भंगे दधिमस्तुना । उष्णांबु
नीर जीर्णे च वृक्षाम्लैः परिकाटिषु । उष्ट्र दुग्धेनोदरेषु तथा तक्रेण वा गवां प्रसन्नं वा तरोगेषु ।
दाडिमांबु निर्शेशि ॥ द्विविधे च विषे दद्यात् घृतेन विषनाशनं । चूर्णं नारायणं नाम दुष्टरोग
गणापहं ॥ नारायणं चूर्णं ॥ ॥ हपुषा त्रिफला चैव त्रायमाणा च पिप्पली । हैम क्षीरी त्वद
क्षैव सातला कटुकावचा ॥ नीलनी सैंधवं कृष्ण लवणं चेति चूर्णयेत् ॥ अंभोदकेन मूत्रेण ।
दाडिमात्रिफलारसेः ॥ तथा मांसरसे नापि यथा योगं पिबेन्नरः ॥ अजीर्णे प्लीह गुल्मे षु शो ।

फार्शोविषमाग्निघ्नं ॥ लीम कामला पांडु कुष्ठाध्मानोदरे ष्वपि ॥ ॥ हपुषाद्यं चूर्णं ॥ शुंठी
हरीतकी कृष्णा त्रिवृत्सौवर्चलं स्वचा समभागानि सर्वाणि सूक्ष्म चूर्णानि कारयेत् ॥ ज्ञेयं
पंचसमं चूर्णं वात शूलहरं परं ॥ आध्मान नाशनं शीघ्र माम वातहरं स्मृतं ॥ ॥ पंचसमं चूर्णं
॥ कर्षमात्रा नू नवं कृष्णात् द्रन्नास्याल्लेोन्मितं ॥ पंडा त्यत्लं च विज्ञेयं चूर्णमेकत्र कारयेत्
॥ कर्षोन्मितां हिलं दत्तं द्वाङ्गेनाध्मान नाशनं ॥ गाढविड्ढा दरं कफानू पित्त शूलानि ना
शयेत् ॥ ॥ नाराचकं चूर्णं ॥ ॥ लवणत्रितयं क्षीरो शतपुष्पा द्वियं पचा ॥ अजमोदाय गंधा
यहपुषा जीरकं द्वयं ॥ मरिचं पिप्पलीमूलं ॥ पिप्पली गजपिप्पली ॥ हिंगुश्च हिंगुपत्री च
सैंटी पूं ठेपं कुंचिका ॥ शुंठी चित्रकाच व्यानां विडंगं चाम्लवेत सं ॥ दाडिमं तिंतिडीकं च
रक्त दंती शतावरी ॥ इंद्रवारुणिका त्यागी देवदारु यवानिका ॥ कुलुंबु लसुन वरुणी ॥
पौष्कर बदराणि च ॥ शिवा चेति समांशानि चूर्णमेकत्र कारयेत् ॥ भावयेद्गार्द्रकर
सैः वीजपूररसैस्तथा ॥ तान्यवेत्सर्पिषाडी सैन्धवोनोस्नोदकेन च ॥ कोल्लं तान्नसावात

Margin notes (left): ३९ ११ / ३१ / कलौंजी ४ / अजमपाल गो... गौजही = ३
Margin notes (right): हिपर २ / सौफ से पेटे / ३९
Interlinear note below last line: वद्दर ... दंत

नोश्रू७

कोष्णदुग्धेनोष्णेनेमस्तुना। कृमीन्हिक्कटीशूलगुदकुक्षिदामयान्। अर्शोविष्टंत्त
मंदाग्निगुल्म प्लीहोदराणिच। हिक्काध्मानश्वासकासजयेदेतन्नसंसयः। एतैरे
वौषधैःसम्यकृघृतंवासाधयेत्सुधीः। बिल्वचणाद्यंचूर्णं॥ ॥तुंबरूणिबिल्वचणं। जा
वानीपुष्करा ह्वयं। यवक्षारभया हिंगुबिडंमानिसमानिच। त्रिविल्वत्वाग विज्ञेया
स्त्वच्छ्मदूनानिकारयेत्। पिवेदुष्णेनतोयेनयवक्वाथेनवापिवेत्। जयेत्सर्वाणिशू
लानिगुल्माध्मानोदराणिच॥ तुंबराद्यं चूर्णं॥ चित्रकोनागरंहिंगुपिप्पलीपिप्पलीजग
वप्पाजमोदामरिचंश्लेपेकंकर्षसंमितं॥ स्वर्जिकाचयवक्षारःसिंधुःसोवर्चलंबिडं॥
सामुद्रिकंरोमकंच कोमलान्यानिकारयेत्। एकीकृत्यपरिवल्कचूर्णंत्त्वावयेन्मातु
लिंगजैः। रसेदाडिमजैर्वापिशोषयेच्चतपांधरे। ततःचूर्णंजायेतगुल्मग्रहणीसाम
जांरुजं। अग्निंचकुरुतेदीप्तिंरुचिकुक्षेन्नैनाशनं॥ चित्रकाद्यंचूर्णं॥ ॥सैंधवंपिप्प
लीमूलंपिप्पलीचव्यचित्रकैः। सर्वाहरीतकीचेतिक्रमवृद्धपानिचूर्णयेत्। वडवानलन

दारापेनवस्=३

रस
बीजौरी४

मैतच्चूर्णमिमं स्यादग्निदीपनम्॥ विडनामेतच्चूर्णम्॥ अजमोदा विडंगानि सैंधवं देवदारु च॥ चि-
त्रकं पिप्पलीमूलं शतपुष्पा च पिप्पली॥ मरिचं चेति कर्षांशं प्रत्येकं कारयेद्बुधः॥ कर्षाः
स्युः पंच पथ्याया दश स्युर्वृद्धदारकात्॥ नागराद्दश चैव स्युः सर्वाण्येकत्र चूर्णयेत्॥ पि-
वेत्कोष्णजलेनैव चूर्णमस्य यथुनाशनं॥ आमवातरुजं हंति संधिपीडां च गृध्रसीं॥ कटि-
४० पृष्ठगुदास्थिजंघयोश्च रुजं जयेत्॥ तूनीप्रतूनी विश्वाची॥ कफवातमयान्जयेत्॥ स-
५९ मेन वा गुडेनास्य वटिकां कारयेत्सुधीः॥ अजमोदाद्यं चूर्णम्॥ हिंगु पाठा तथा धान्यं दा-
डिमं चित्रकं शठी॥ अजमोदा त्रिकटुकं शतपुष्पा चाम्लवेतसः॥ अजाजी धातकी तिंतिडीकं च जी-
रकं पुष्करं वचा॥ चव्यं क्षारद्वयं पंच लवणानीति चूर्णयेत्॥ प्राग्भोजनस्य मध्ये वा चूर्णमिमं
तत्प्रयोजयेत्॥ पिबेद्वा जीर्णमद्येन तक्रेणोष्णोदकेन वा॥ गुल्मे वातकफोद्भूते हृद्रोगे हृच्छू-
लि कासेषु च॥ हृद्बस्तिपार्श्वमूले च कुक्षिशूले च गुदयोनिजे॥ मूत्रकृच्छ्रे तथाध्माने पांडुरोगे
रुच्यो तथा॥ हिक्कायां च यकृत्प्लीह्नि श्वासे कासे गलग्रहे॥ गुह्यस्पार्श्वविकारेषु॥ चूर्णमे- २४०

पिसद्य

तत्प्रशस्यते। नाविलं मातुलुंगस्य वक्रसैः स्वरसेन वा। कुष्ठीशमुटिकां वैद्यो वातश्लेष्मामयापहं॥॥ हिंग्वाद्यं चूर्णं॥ ॥यवानी दाडिमं शुंठी तिंतडी चाम्लवेतसौ। बदराम्लं च कुर्वीत चतुः संमितानि च॥ सार्द्धं द्विसागमरिचं पिप्पली दशशाणिका। त्वक्सौवर्चलं धान्यकाजीरकं द्वि द्विशाणकं। चतुःषष्टिमितैः शाणैः शर्करा मात्रया योजयेत्। चूर्णितं सर्वमेकत्र यवानीषाडवाभिधं॥ चूर्णं जयेत् पांडुरोगं हृद्रोगं ग्रहणीं ज्वरं। छर्दि शोषा‑तिसारश्च प्लीहानाहविबंधता॥ अरुचं शूलमंदाग्निमर्शांसि जिह्वागलामयान्। यवानीषाडवं चूर्णं॥ ॥तालीसं मरिचं शुंठी पिप्पली वंशरोचना। एक द्वि त्रि चतुः पंच कर्षैस्तान्‌गान्प्रकल्पयेत्॥ एलात्वचोस्तु कर्षार्द्धं प्रत्येकं तु भागमावपेत्। द्वात्रिंशत्कर्षतुलिताप्रदेया सर्करा बुधैः॥ तालीसाद्यमिदं चूर्णं रोचनं पाचनं परं॥ कासश्वासज्वरहरं सर्वातीसारनाशनं॥ शोषाध्मानहरं प्लीहग्रहणीपांडुरोगजित्। पक्वा वा सर्करे चूर्णं॥ क्षिपेत्स्यात्गुटिकाकृतः॥ तालीसाद्यं चूर्णं॥ शितोपलाषोडशस्यादष्टौ स्याद्वंसरोचना॥

हिंग्वादि चूर्ण

पिप्पली स्याच्चतुः कर्षा स्याद्वेला च द्विकार्षिका। एक कर्षस्त्वचः कार्यश्चूर्णयेत्सर्वमे
कतः। सितोपलादिकं चूर्णं मधुसर्पिर्युतं लिहेत्॥ श्वासकासक्षयहरं हस्तपादां
गदाहजित्। मंदाग्निं सुप्तजिह्वात्वं पार्श्वशूलमरोचकं। ज्वरमूर्द्धगतं रक्तं पित्तमाशु
व्यपोहति॥ सितोपलादिचूर्णं॥ सामुद्रं लवणं कार्यमष्टकर्षमितं बुधैः। पंचसौव
र्चलं ग्राह्यं विडसैंधवधान्यकं। पिप्पली पिप्पलीमूलं कृष्णजीरकपत्रकं। नागके
सरतालीसमम्लवेतसकं तथा॥ द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः। मरिचं
४१ जीरकं विश्वमेकैकं कर्षमात्रकं। दाडिमं स्याच्चतुःकर्षं त्वगेला चार्द्धकार्षिका। एतच्चूर्णी
कृतं महद्भास्करलवणं शुभं। शाणप्रमाणं देयं तु मस्तुतक्रसुरासवैः। वातश्लेष्मभ
वं गुल्मं प्लीहानमुदरं क्षयं। अर्शांसि ग्रहणीं कुष्ठं विबंधं च भगंदरं। शोफं शूलं च श्वा
सकासामदोषं च हृद्रुजं॥ मंदाग्निं नाशयत्येतद्दीपनं पाचनं परं। सर्वलोकहिता
र्थाय भास्करेणोदितं पुरा॥ भास्करलवणचूर्णं॥ एलाप्रियंगुमुस्ता त्रिकोलमज्जा। ४२

चपिप्पली। चीचंदनं तेशाल्मा जातीवंगं नागकेसरं। एतच्चूर्णीकृतं सर्वे सिताक्षौद्रयुतं
लिहेत्॥ वातपित्तकफोद्भूतं छर्दिं हंत्याति वेगतः॥ एलाद्यं चूर्णं॥ ॥मूलं पत्रं फलं पु
ष्पं च चानि वत्समाहरेत्। सूक्ष्म चूर्णमिदं कुर्यात् पत्रे पंचदलोदितं। लोहभस्म
तकैः [illegible] कमहे कचित केन ज्ञातकं विडंगानि सर्करामलकानि शा। पिप्पली मरि
चं शुंठी ताकुची कृतमात्रकं गोक्षुरश्च पलोन्मात्रमेकैकं कारयेद्बुधः॥ सर्वमेकीकृ
तं चूर्णं त्रिगराजेन तावयेत्। [illegible] नागबलाक्षेण खदिराशनवारिणा॥ सावयित्वाच
संयुक्तं कर्षमात्रं ततः पिवेत्। खदिरासनतोयेन सर्पिषा पयसाथवा। मानेन सर्वे
कुष्टानि विनिहंति रसायनं॥ पंचनिंबमिदं चूर्णं सर्वरोगप्रणाशनं॥ पंचनिंबचूर्णं॥
॥शतावरी गोक्षुरश्च वीजं वकपिकच्छुकां। गांगेरुकी नागबला बीजमिक्षुरकोद्भवं॥ चू कोकल तान
र्णितं मर्दमकं [illegible] गोदुग्धेन पिवेन्निसि। न च क्षयीति नारी नि नरः चूर्णप्रभावतः॥ वा
विधारा
जीकरं पुष्टिकरं चूर्णं॥ ॥अश्वगंधादशफला तन्मात्रा एरंडदारुकः। चूर्णीकृत्यो तत्र वि

ज्ञानू घृतसंताड्डेनिक्षपयेत्सा कर्षैकं पयसा पीत्वा नारीसिन्नैव तृप्यति। आगवाप्रमदांत्त्याद्व
लीपलितवर्जितः॥ वाजीकरणं॥ ॥ चित्रकं त्रिफला मुस्तं विडंगं च चूर्णानि च समभा
गानि कार्याणि नवभागास्तथायसः॥ एतदेकीकृतं चूर्णं मधुसर्पिर्युतं लिहेत्। गोमूत्रम
थवा तक्रमनुपानं प्रशस्यते। पांडुरोगं जयत्युग्रं हृद्रोगं च भगंदरं। शोफकुष्ठोदरार्शांसि
(केशरे। पिपाहा)
४२॥ मंदाग्निमरुचिं कृमीन्॥ नवायसं॥ अकारकरभः शुंठी कंकोलं कुंकुमं कणा। जातीफ
लं लवंगं च संदनं चेति कार्षिका॥ चूर्णानि निर्मांसतः कुर्यादहिफेनपलोन्मितं। सर्वा
मकीकृतं सूक्ष्मं माषैकं मधुना लिहेत्॥ शुक्रस्तंभकरं चूर्णं पुंसामानंदकारकं। नारी
णां प्रीतिजननं सेवेत निशि कामुकः॥ करस्तादिचूर्णं शुक्रस्तंभनकरं॥ ॥ इति श्रीदा
मोदरसूनोः शार्ङ्गधरविरचितायां संहितायां चिकित्सास्थाने चूर्णकल्पनाध्यायः
॥६॥ ॥ वटकाश्च कथ्यंते तन्नाम गुटिका वटी। मोदको वटिका पिंडी गुडो वर्तिस्तथो ४२
च्यते॥ लेहवत्साध्यते वह्नौ गुडो वा शर्करा अथवा। गुग्गुलुर्वा क्षिपेत्तत्र चूर्णं तन्निर्मिता वटी

कुर्याद्वह्निसिद्धेन क्वचिद्गुग्गुलुना वटीं ॥ द्रवेण मधुना वापि गुटिकां कारयेद्बुधः ॥ सिता चतुर्गुणा दे-
या वटीषु द्विगुणो गुडः ॥ चूर्णे चूर्णसमः कार्यो गुग्गुलुर्मधु तत्समं ॥ द्रवं च द्विगुणं देयं मोदकेषु भिषग्व-
रैः ॥ कर्षप्रमाणा तन्मात्रा बलं दृष्ट्वा प्रयोजयेत् ॥ स यथा ॥ इंद्रवारुणिका मुस्तं शुंठी दंती हरीतकी ॥ त्रि-
वृत्सटी विडंगानि गोक्षुरश्चित्रकस्तथा ॥ तेजोव्हा च द्विकर्षाणि प्रत्येकं द्व्याढिकां रयेत् ॥ सूरण-
स्य पलान्यष्टौ वृद्धदारुकतः पलं ॥ चतुःपलं स्याद्भल्लातं क्वाथयेत्सर्वमेकतः ॥ जलद्रोणे चतु-
र्थांशं गृह्णीयात्क्वाथमुत्तमं ॥ क्वाथद्व्यात्रिगुणितं गुडं क्षिप्त्वा पुनः पचेत् ॥ सम्यक्पक्वं च तं ज्ञा-
त्वा चूर्णान्येतानि दापयेत् ॥ चित्रकत्रिवृता दंती तेजोव्हा पलिका पृथक् ॥ पृथक् त्रिपलिका का-
र्या व्योषैलामरिचत्वचः ॥ निक्षिपेन्मधु शीते च तस्मिंस्त्र्यस्य प्रमाणितं ॥ एवं सिद्धो भवेच्छ्रीमान्
वाकुष्माण्डगुडः शुभः ॥ जयेदर्शांसि सर्वाणि गुल्मान्वातोदरं तथा ॥ आमवातं प्रतिश्यायं ग्रहणीक्षयपी-
नसान् हलीमकं पांडुरोगं प्रमेहं च रसायनः ॥ श्रीवाकुष्माण्डो गुडः ॥ मरिचं कर्षमात्रं स्यात्पिप्पलीकर्षसं-
मिता ॥ अर्द्धकर्षो यवक्षारः कर्षयुग्मं च दाडिमं ॥ एतच्चूर्णीकृतं युंज्यादष्टकर्षगुडेन हि ॥ शाणप्रमाणां गु-
टिकां कृत्वा वक्त्रे च धारयेत् ॥ अस्याः प्रभावात्सर्वेपि कासा यांत्येव संक्षयं ॥ कासे मरिचादिगुटिका ॥ गुड-
शुंठीशिवामुस्तैर्धारयेद्गुटिकां मुखे ॥ श्वासकासेषु सर्वेषु केवलं वा विभीतकं ॥ श्वासकासयोः ॥ आम

लेकमलं कुष्ठं लाजाश्च वटरोहकं। एतच्चूर्णस्य मधुना गुटिकां धारयेन्मुखे। तृष्णां प्रवृद्धां हन्त्येषा मुखशोषं
रा. ४२ च दारुणं। मुखशोषे। विडंगं नागरं कुष्ठं सोपथ्या मलविभीतकौ। वासा गुडूची भल्लातं सविषं चात्र योजये कुष्ठविषं
त्। एतानि समभागानि गोमूत्रेणैव पेषयेत्। गुंजाभा गुटिका कार्या दद्यादार्द्रकजैरसैः। एकमज्जीर्णयुक्ता
४३ स्यादेवि सूच्यां च दापयेत्।। तिस्रश्च सर्पदष्टस्य चतुस्त्रिः सन्निपातिनः। गुटिका जीवनी नाम्ना सञ्जी
वयति मानवं। संजीविनी गुटिका। व्योषाम्लवेतसं चव्यं तालीसं चित्रकं तथा। जीरकं तिंतिडीकं चव
दल·वी·नीपगज इलायची॰ त्यकं कर्षभागिकं। त्रिसुगंधि त्रिसाणं स्यात् गुडः स्यात् कर्षविंशतिः। व्योषादिगुटिका सेव्या पीनस
श्वासकासजित्। रुचिस्वरकरा ख्याता प्रतिश्यायप्रणाशिनी। पीनसादौ व्योषादिगुटिका। आ
मेषु सगुडां सुंगीम जीर्णे गुडपिप्पली। ... जीरं गुडं दद्यादर्शःसु च गुडाभया। गुडचतुष्टयगुटिका।
हृद्दारकं भल्लातं सुंठिचूर्णेन संयुतं। मोदकं सगुडं हन्यात् ... त्रयादि धार्शः कृतांकुजां। हृद्दारकादि
मोदकमर्शस्सु। शुष्कसूरणचूर्णस्य भागा द्वात्रिंशदाहरेत्। भागान् षोडश चित्रस्य सुंठ्या भाग चतु
ष्टयं। द्वौ भागौ मरिचस्यापि सर्वाण्येकत्र चूर्णयेत्। गुडेन पिंडिकां कुर्यादर्शसां नाशिनीवरा। अर्श
सि सूरणपिंडी। सूरणोद्धृदारु भागैः षोडशभिः पृथक्। मूसली चित्रकौ ते पाव ष्ट भागमितौ पृ राम: ४२
थक्। त्रिवा विभीतको धात्री विडंगं नागरं कणा। भल्लातं पिप्पलीमूलं तालीसं च पृथक् पृथक्। च

तुर्भाग समाणां नित्वगेलामरिचं तथा । द्विभाग गमा बाणि एथकं ततस्त्वेकत्र चूर्णयेत् । द्विगुणेन गुडेना
थ गुटिकां कारयेद्बुधः । प्रबलाग्निकरा एते तथार्शोनाशनेपराः । ग्रहणीवातकफजां श्वासकासं तथा
मयं । प्लीहानं श्लीपदं शोफं हिक्कां मेहं भगंदरं । निहन्तुः पलितं हव्यास्तथा मेध्या रसायनाः । अर्शसि
द्वहस्तू रणमोदकः । अर्शोसि शातदा गुटिका । त्रिपलीमृंगवेरस्य चतुर्थं मरिचस्य चापि पिप्पल्याः कु
डवार्द्धं चेच व्यायोः पलमिव रातालीसपत्रस्य पलं पलार्द्धं केशरस्य च । द्विपले पिप्पलीमूलाद्द्वक
र्षं च पत्रकं । सूक्ष्मैला [illegible]र्षमेकं चैकैकं त्वगुशीरमणा लयोः । गुडात्पलानि त्रिंशत्तु चूर्णमेकत्र कारये
त् । अक्षतप्रमाणा गुटिका प्राणदेति च सा स्मृता । चरकोक्ता मीयं जलानुपानेन । त्रिफलात्र्यूषणं च
सोनमषी व्यं पिप्पलीमूलचित्रकौ । दारुमाक्षिकधातुस्त्वक्दार्वीमुस्तं विडंगकं । प्रत्येकं कर्षमात्राणि सर्वं द्विगु
मनूरमाराऊ बौः णं ततथा । मंडूरं चूर्णयेत्सर्वं गोमूत्रेष्टगुणे क्षिपेत् । पक्त्वा च वटकान् कृत्वा दद्यात्तक्रानुपानतः । कामलां
पांडु मेहार्शः शोथ कुष्ठ कफामयान् । ऊरुस्तंभमजीर्णं च प्लीहितं नाशयेदपि । पांडुरोगादौ मंडूरवटिकः
चंद्रप्रभा वचा मुस्ता भूनिंबामरदारवः । हरिद्रातिविषा भार्गी पिप्पलीमूलचित्रकौ । धान्यकं त्रिफला चव्यं द्वाबी
विडंगं गजपिप्पली । व्योषं माक्षिकधातुश्च द्वौ क्षारौ लवणत्रयं । एतानि शाणमात्राणि प्रत्येकं कारयेद्बु
धः । त्रिवृद्दंती पत्रकं च त्वगेला वंशरोचना । प्रत्येकं कर्षमात्राणि कुर्यादेतानि बुद्धिमान् । द्विकर्षहत

लोहं स्याच्चतुः कर्षा सिता भवेत्॥ शिलाजित्वष्टकर्षं स्यादष्टौ कर्षास्तु गुग्गुलोः॥ एभिरेकत्र संचूर्णैः कर्तव्या-
प्रा॰ ४५ गुटिका शुभा। चंद्रप्रभेति विख्याता सर्वरोगप्रणाशिनी। प्रमेहं विंशतिं कृच्छ्रं मूत्राघातं तथाश्मरीं। वि-
बंधानाहशूलानि मेहनं ग्रंथिमर्बुदं। अंडवृद्धिं तथा पांडुं कामलां च हलीमकं। अंत्रवृद्धिं तथा पांडुं काम-
लां कटिशूलं श्वासं कासं विचर्चिकां। कुष्ठान्यर्शांसि कंडूश्च प्लीहोदरं भगंदरं। दंतरोगं नेत्ररोगं स्त्री-
णामार्त्तवं कां रुजं। पुंसां शुक्रगतान् दोषान् मंदाग्निमरुचिं तथा। वायुपित्तकफं हन्याद्बल्या वृष्या रसा-
यिनी। चंद्रप्रभायां कर्षस्तु चतुःशाणो विधीयते। प्रमेहादौ चंद्रप्रभा गुटिका। जवानी जीरकं धान्यं मरि-
मस्लाकनी कलोंजी चं गिरिकर्णिका। अजमोदा पकुंची च चतुःशाणा पृथक् पृथक्। हिंगु षट्शाणिकं कार्यं क्षारौ लवणप-
चकं। त्रिवृच्चाष्टमितैः शाणैः प्रत्येकं कल्पयेद्बुधः। दंतीशटी पौष्करं च विडंगं दाडिमं शिवा। चित्रोम्ल-
वेतसः शुंठी। शाणैः षोडशभिः पृथक्। बीजपूररसेनैषां गुटिकां कारयेद्बुधः। घृतेन पयसा मद्ये-
नाम्लेनोष्णोदकेन वा। पिबेत्कांकायनप्रोक्तां गुटिकां गुल्मनाशिनीं। मद्येन वातिकं गुल्मं गोक्षीरेण च पि-
त्तिकं। गोमूत्रेण कफाद्गुल्मं दशमूलैस्त्रिदोषजं। उष्ट्रीदुग्धेन नारीणां रक्तगुल्मं निवारयेत्। हृ-
द्रोगं ग्रहणीं शूलं कृमीनर्शांसि नाशयेत्। गुल्मे कांकायनगुटिका। नागरं पिप्पली चव्यं पिप्पली- गुल्मः
मूलचित्रकौ। भृष्टं हिंग्वजमोदा च सर्षपा जीरकद्वयं। रेणुकेंद्रयवाः पाठा विडंगं गजपिप्पली क- ४६

वीकुल

।टुकातिविषाभार्गीविचाम्लवेतिभागतः।प्रत्येकं शाणिकान्विष्णुः द्व्याग्लीमानि विंशतिः।द्रव्येभ्यः
सकलेभ्यश्च त्रिफला द्विगुणा भवेत्।एभिः चूर्णीकृतैः सर्वैः समो देयश्च गुग्गुलुः।एकपिंडं ततः कृ
त्वा धारयेद्घृतभाजने।गुटिकाः शाणमात्रा तु कृत्वा ग्राह्या यथोचिता।गुग्गुलुर्योगराजोयं त्रिदोषघ्नो
रसायनः।मैथुनाहारपानानां त्यागो नैवात्र विद्यते।सर्वान्वातामयान्कुष्ठमर्शांसि ग्रहणीगदं
।प्रमेहं वातरक्तं च नाभिशूलं भगंदरं।उदावर्त्तं क्षयं गुल्ममपस्मारमुरोग्रहं।मंदाग्निं श्वासकासांश्च
नाशयेदरुचिं तथा।रेतोदोषहरः पुंसां रजोदोषहरः स्त्रियाः।पुंसामपत्यजनको वंध्यानां गर्भदस्त
था।रास्नादिक्वाथसंयुक्तो विविधं हंति मारुतं।काकोल्यादिसृतास्ति त्तं कफमारग्वधादिना।दार्वीसृ
तेन मेहान्गोमूत्रेण च पांडुतां।मेदोवृद्धिं च मधुना कुष्ठं निंबसृतेन च।छिन्नाक्वाथेन वातास्त्रं शोथं
शोथं शूलं कणासृतात्। शूलं कणासृता त।पाटलाक्वाथसहितो विषं मूषकजं जयेत्।त्रिफलाक्वाथसहितो नेत्रार्त्तिं हंति दारु
णां।पुनर्नवादिक्वाथेन हन्यात्सर्वोदराण्यपि।योगराजगुग्गुलुः।त्रिफलाया स्त्रयः प्रस्थाः प्रत्येकम
४२ मृतामवेत्।संकुट्यं लोहपात्रे च सार्द्धद्रोणांबुना पचेत्।जलमर्द्धसृतं ज्ञात्वा गृह्णीयाद्वस्त्रगालि
तं।ततः क्वाथे क्षिपेच्छुद्धं गुग्गुलुं प्रस्थसंमितं।पुनः पचेदयः पात्रे दर्व्या संघट्टयन्मुहुः।सांद्रीभूतं च तं।

शा॰ ४५ ४६ ज्ञात्वा गुडपाकसमाकृतिं। चूर्णीकृत्य ततस्तत्र द्व्याणीमानि निःक्षिपेत्। त्रिफला द्विपला ज्ञेया गुडूची पलि
का मता। षडक्षं त्र्यूषणं प्रोक्तं विडंगानां पलार्द्धकं। दंती कर्षमिता कार्या त्रिवृत्कर्षमिता स्मृता। ततः पिंडीकृ
तं सर्वं घृतपात्रे विनिःक्षिपेत्। गुटिका शाणिका कार्या भुंज्याद्दोषाद्यपेक्षया। अनुपाने भिषग् दद्यात्को
ष्णं नीरं पयोथवा। मंजिष्ठादिशृतं वापि युक्तियुक्तमतः परं। जयेत्सर्वाणि कुष्ठानि वातरक्तं त्रिदोषजं।
सर्वव्रणांश्च गुल्मांश्च प्रमेहपिडिकास्तथा। प्रमेहोदरमंदाग्निकासश्वयथुपांडुताः। हंति सर्वामय
यान्नित्यमुपयुक्तो रसायनः। कैशोरिकाभिधानोयं गुग्गुलुः कांतिकारकः। वासादिना नेत्रगदान्
गुल्मादीन्वरुणादिना। क्वाथेन खदिरस्यापि व्रणकुष्ठानि नाशयेत्। अम्लं तीक्ष्णमजीर्णं च व्य
वायं श्रममातपं। मद्यं रोषं त्यजेत्सम्यक् गुणार्थी पुरसेवकः। कैशोरगुग्गुलुः। वातरक्ते। त्रिपलं त्रि
फला चूर्णं कृष्णाचूर्णं पलोन्मितं। गुग्गुलुः पंचपलिकः क्षोदयेत्सर्वमेकतः। ततस्तु गुटिकां कृत्वा
प्रयुंज्याद्वह्न्यपेक्षया। भगंदरं गुल्मशोथावर्शांसि च विनाशयेत्। त्रिफलागुग्गुलुः। अष्टाविंशतिप
लान्यत्र संख्यातान्यानीय गोक्षुरं। विपचेत्षड्गुणे नीरे क्वाथो ग्राह्योर्द्धशेषितः। ततः पुनः पचेत्तत्र एमः
पुरं सप्तपलं क्षिपेत्। गुडपाकसमाकारं ज्ञात्वा तत्र विनिक्षिपेत्। त्रिकटु त्रिफला मुस्तं चूर्णितं ४५

पलसप्तकं । ततः पिंडीकृतस्याथ विशुद्धिकामुपयोजयेत् । हन्यात् प्रमेहं कृच्छ्रं च प्रदरं मूत्रघातकं ।
वातास्रं वातरोगांश्च शुक्रदोषं तथाश्मरीं । प्रमेहे गोक्षुरादिगुग्गुलुः । आभाश्वगंधाहबुषागुडू
चीशतावरीगोक्षुरकं च रास्ना । शताह्वा शठी यो यवानी च नागरं चेति समेश्च चूर्णं । तुल्यं भ
वेत्कौशिकमत्र मध्ये देयं तथा सर्पिरतो र्धभागं । अर्धांश भागात्परतः प्रयोगात् कृत्वानुपानं सुर
यायपुष्पैः । मद्येन वा कोष्णजलेन वाथ क्षीरेण वा मांसरसेन वापि । कट्यग्रहे गृध्रसि खंजवाते हनु
ग्रहे जानुनिपादगुल्मे । संधिस्थिते मज्जगते च वाते मज्जास्थिते स्नायुगते च कुष्ठे । रोगान् हन्त्ये वात
कफानुविद्धान् वातेरितान् लघु ग्रहवातरोगान् । बस्ताश्रितविद्रधिषु च खंज वाते त्रयोदशांगं प्रवदंति तज्ज्ञाः
। त्रिफलाष्टपला कार्या भल्लातानां चतुःपलं । वाकुची पंचपलिका विडंगानां चतुःपलं । हतं लोहं त्रि
दचैवं गुग्गुलुश्च शिलाजतु । एकैकं पलमात्रं स्यात् पलार्द्धं पौष्करं भवेत् । चित्रकस्य पलार्द्धं स्याद् द्वि ६
गुणं मरिचं मरिचं भवेत् । नागरं पिप्पली मुस्तं त्वगेला पत्रकुंकुमं । शाल्मोक्षितं स्यादेकैकं चूर्णये
त्सर्वमेकतः । ततस्तत्र द्विपेच्चूर्णं पक्वखंडे च तत्समे । मोदकान् पलकान् कृत्वा प्रयुंजीत यथोचितं ।
हन्युः सर्वाणि कुष्ठानि त्रिदोषप्रभवानयान् । भगंदर प्लीह गुल्मान् नृजिह्वा तालुगतामयान् । द्वितोद्वि

भृगतान्रोगान्हन्याद्दृष्टगतान्यपि ।९७। भोजनस्यादौ यस्याद्धः कायस्थितेगदे । भैषज्यं भक्तमध्ये च

शा० गेजठरसंयुते । भोजनस्योपरिष्टाच्च ऊर्द्ध्वजे गुणदेषु च ।। त्रिफलामोदकोगुग्गुलुः ।। कांचनारत्वचो ग्राह्यं

४६ पलविंशतिकं बुधैः । त्रिफला षट्पलाया स्यात् त्रिकटु स्यात्पलत्रयं । पलैकं वरुणः कार्यः एलात्वक्पत्र

46 कंतथा ।। एकैकं कर्षमात्रं स्यात्सर्वाण्येकत्र चूर्णयेत् । यावच्चूर्णमिदं सर्वं तावन्मात्रस्तु गुग्गुलुः । संकुट्य

सर्वमेकत्र पिंडीकृत्वा च धारयेत् । गुटिकाः शाणिकाः कृत्वा प्रातर्ग्राह्या यथोचिताः । गंडमालां जयत्यु

ग्रामपचीमर्बुदानि च । ग्रंथीन्व्रणांश्च गुल्मांश्च कुष्ठानि च भगंदरं । प्रदेयश्चानुपानार्थं क्वाथो मुं

डितिकाभवः । क्वाथः खदिरसारस्य पथ्या क्वाथोथ उष्णकः ।गंडमालादौ कांचनारगुग्गुलुः ।। निस्तु

षमाषचूर्णं स्यात्तथा गोधूमसंभवं । निस्तुषयवचूर्णं च शालितंदुलजं तथा । सूक्ष्मं च पिप्पलीचूर्णं

पलिकान्युपकल्पयेत् । तत एकीकृतं चूर्णं भर्जयेत् गोघृतेन च । अर्द्धमात्रेण सर्वेभ्यः ततः खंडं सम

क्षिपेत् भजेत् ।। जलं च द्विगुणं दत्वा पाचयेच्च शनैः शनैः । ततः पक्के समुद्धृत्य वृत्तान्कुर्वीत मोदकान् । भु कृत्वेतिच्छिः

क्त्वा सायं पलैकं च पिबेत्क्षीरं चतुर्गुणं । वर्जनीयो विशेषेण ह्याम्लो द्वौ रसावपि । कृत्वैवं रमते शा म:

नारीं वै क्षीणे चीयते नरः । वीर्यवृद्धो माषादिमोदकः ।। छ ।। इति श्री शार्ङ्गधरेण विरचितायां ४६

संहितायां चिकित्सास्थाने वटककल्पनाध्यायः॥ ॥अथावलेहकल्पना॥ क्वाथादेर्यत्पुनः पा-
काद्घनत्वं सा रसक्रिया। सोऽवलेहश्च लेहश्च तन्मात्रा स्यात्पलोन्मिता। सिता चतुर्गुणा कार्या चूर्णाच्च
द्विगुणो गुडः। द्रवं चतुर्गुणं दद्यादिति सर्वत्र निश्चयः। सुपक्वे तंतुमत्त्वं स्यादवलेहेऽप्सु मज्जनं। स्थिर-
त्वं पीडिते मुद्राङ्गगन्धवर्णरसोद्भवं। दुग्धमिक्षुरसं यूषं पंचमूलकषायकं। वासाक्वाथं यथायोग्यमनु-
पानं प्रशस्यते। सयथा॥ कंटकारी तुलां नीरद्रोणे पक्त्वा कषायकं। पादशेषं गृहीत्वा च तस्मिंश्चू-
र्णानि दापयेत्॥ पृथक्पलांशान्येतानि गुडूची चव्य चित्रकाः। मुस्तं कर्कटशृंगी च त्र्यूषणं धन्वया-
सकः। भार्गी रास्ना शटी चैव शर्करा पलविंशतिः। प्रत्येकं च पलान्यष्टौ प्रदद्याद्घृततैलयोः। पक्वा ले-
वंशलोचन हलमानीय शीते मधु पलाष्टकं। चतुःपलं तुगाक्षीर्याः पिप्पलीनां चतुःपलं। क्षित्वा निदध्यात्सुदृ-
ढे मृण्मये भाजने शुभे। लेहोऽयं हन्ति हिक्काश्च श्वासकासानशेषतः। श्वासादौ कंटकार्या अवलेहः॥
पाटलारणिकाश्मर्य्यो बिल्वारलुकगोक्षुराः। पर्ण्यौ बृहत्यौ पिप्पल्यः शृंगी द्राक्षामृतामया। बलाभू-
म्यामलकी वासा ऋद्धिर्जीवंतिका शटी। जीवकर्षभकौ मुस्तं पौष्करं काकनासिका। मुद्गपर्णी माषपर्णी काकजंघा
विदारी च पुनर्नवा। काकोली कमलं मेदा सूक्ष्मैला गुरुचंदनं। एकैकं पलसंमानं स्थूलचूर्णितमो-

पाले वृधं।एकीकृत्य महत्यां चैव पंचामलकशतानि च।पचेद्द्रोणजले सिद्धां ज्ञात्वाष्टावशेषितं।ततस्तु तान्याम
लानि निःकुलीकृत्य वाससा।दृढहस्तेन संमर्द्य क्षिप्ता तत्र ततो घृतं।पलसप्तमितं तानि किंचिद्भृष्टा
शा. न्यवक्रिना।ततस्तत्र क्षिपेत् क्वाथं मत्स्यंडीं चार्द्धतुलोन्मितां।लेहवत्साधयित्वा च चूर्णानीमानि दाप
४१ येत्।पिप्पली द्विपला देया तुगाक्षीरी चतुःपला।प्रत्येकं च त्रिशाणाः स्युस्त्वगेलापत्रकेसराः।तत
स्त्वकीकृते तस्मिन् क्षिपेत् क्षौद्रं च षट्पलं।इत्येवं च्यवनप्रोक्तं च्यवनप्राशसंज्ञितं।लेहं वह्निबलं
दृष्ट्वा खादेत् सर्वरसायनं।बालवृद्धक्षतक्षीणा नारी क्षीणाश्च शोषिणः।हृद्रोगिणः स्वरक्षी
णा ये नरास्ते शुपुज्यते।कासंश्वासं पिपासां च वातास्रमुरसो ग्रहं।वातं पित्तं शुक्रदोषं मूत्रदोषं च ना
शयेत्।मेधां स्मृतिं स्त्रीषु हर्षं कांतिं वर्णं प्रसन्नतां।अस्य प्रयोगात् प्राप्नोति नरो जीर्णविवर्जितः।च्यव
नप्राशावलेहः॥निष्कुलीकृत्य कूष्मांडखंडान् पलशतं पचेत्।निक्षिप्य द्वितुलं नीरमर्द्धशिष्टं च
गृह्यते।तानि कूष्मांडखंडानि पीडयेद् दृढवाससा।आतपे शोषयेत् किंचित् त्रिशूलाग्रैर्व्वेधयेत्
।क्षिप्त्वा ताम्रकटाहे च दद्यात् षट्पलं घृतं।तेन किंचिज्जारयित्वा सर्वोक्तं तत्र संक्षिपेत्।खंडात्तुल रा.म. ४१
शतं दत्वा सर्वमेकत्र पाचयेत्।सुपक्वे पिप्पली शुंठी जीरकाणां द्विपलं पृथक्।एलाकर्पलार्द्धधा

न्याकं पत्रैलामरिचं त्वचा। चूर्णीकृत्य क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत्। खादेदग्निबलं दृष्ट्वा रक्तपि
त्तीज्वरी क्षयी। शोषार्त्तस्तातमः छर्दिकासश्वासक्षतातुरः। कूष्मांडकावलेहोऽयं बालवृद्धेषु युज्यते। उ
रःसंधानकृद्वृष्यो बृंहणो बलकृन्मतः। कूष्मांडकावलेहः। पुत्तया कूष्मांडखंडस्य स्मरणं विपचेत्सुधीः
। अर्शसामथ वातानां मंदाग्नीनां च युज्यते। अर्शोसितखंडस्मरणावलेहः। हरीतकीशतं भद्रं यवानामाढ
कं तथा। पलानि दशमूलस्य विंशतिश्च श्रेयोजयेत्। चित्रकं पिप्पलीमूलमपामार्गः सटी तथा। कपि
कच्छुः शंखपुष्पी भार्गी च गजपिप्पली। बला पुष्करमूलं च पृथक् द्विपलमात्रया। पचेत्संचाढकेनीरे
यवैः स्विन्नैः सतं नयेत्। तत्राभयाशतं दद्यात्क्वाथे तस्मिन् विचक्षणः। सर्पिस्तैलाष्टपलकं क्षिपेद्गु
डतुलां तथा। पक्वोलेहत्वमानीय सिद्धे शीते पृथक् पृथक्। क्षौद्रं च पिप्पलीचूर्णं दद्यात्कुडवमात्रया
। हरीतकीद्वयं खादेत्तेन लेहेन नित्यशः। क्षयं कासं ज्वरं श्वासं हिक्काशोंऽरुचिपीनसान्। ग्रहणीनाशयत्ये
षवलीपलितनाशनः। बलवर्णकरः पुंसामवलेहो रसायनः। विहितोऽगस्त्यमुनिना सर्वरोगप्रणाश
नः। अगस्तिहरीतक्यावलेहः॥ कुटजत्वक्तुलां द्रोणे जलस्य विपचेत्सुधीः। कषायं पादशेषं च गृह्णी
याद्वस्त्रगालितं। त्रिंशत्पलं गुडं स्यात्तु दत्वा च विपचेत्पुनः। सौद्रत्वमागतं दृष्ट्वा चूर्णानीमानि दापयेत्।
रसांजनं मोचरसं त्रिकटु त्रिफलां तथा। लज्जालुं चित्रकं पाठां बिल्वमिंद्रयवान्वचां। भल्लातकं प्रति वि

णां विडंगानि च वालुकं । प्रत्येकं पलसंमानं घृतस्य कुडवं तथा ॥ सिद्धशीते ततो दद्यान्मधुनः कुडवं तथा ॥ ज
शा॰ येदेषावलेहस्तु सर्वान्यर्शांसि वेगतः ॥ दुर्नामप्रभवान्रोगानतीसारमरोचकं ॥ ग्रहणीपांडुरोगं च रक्तपि
४८ त्तं च कामलां ॥ अम्लपित्तं तथा शोथं कासं चैव प्रवाहिकां ॥ अनुपाने प्रयोक्तव्यमाज्यं तक्रं पयो दधि ॥ घृ
तं जलं वा जीर्णे च पथ्यभोजी भवेन्नरः ॥ कुटजाद्यावलेहः ॥ कुटजत्वक्तुलामार्द्रां द्रोणनीरे विपाचये
त् ॥ पादशेषं रसं तं नीत्वा चूर्णान्येतानि दापयेत् ॥ लज्जालु धातकी बिल्वं पाठा मोचरसस्तथा ॥ मु
स्तं प्रतिविषा चैव प्रत्येकं स्यात्पलं पलं ॥ ततस्तु विपचेद्भूयो यावद्दर्वीप्रलेपनं ॥ जलेन च्छागीदुग्धेन
पीतो मंडेन वा जयेत् ॥ सर्वातीसारघोरांस्तु नानावर्णान्सवेदनान् ॥ असृग्गदं समस्तं च सर्वार्शांसि
प्रवाहिकां ॥ कुटजाद्यावलेहः ॥ ॥ इति श्रीशार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्था
नेऽवलेहकल्पनाध्यायः ॥ अथ स्नेहकल्पना ॥ कल्काच्चतुर्गुणीकृत्य घृतं वा तैलमेव वा । चतुर्गुणे
द्रवे साध्यं तस्य मात्रा पलोन्मिता ॥ निःक्षिप्य क्वाथयेत्तोयं क्वाथ्यद्रव्याच्चतुर्गुणं ॥ पादशिष्टं गृहीत्वा च
स्नेहं तेनैव साधयेत् ॥ चतुर्गुणं मृदुद्रव्ये कठिनेऽष्टगुणं जलं ॥ तथा च मध्यमे द्रव्ये दद्यादष्टगुणं पयः ॥ र॰म॰
अत्यंतकठिने द्रव्ये नीरं षोडशकं मतं ॥ कर्षादितः पलं यावत् क्षिपेत्षोडशकं जलं ॥ तदूर्ध्वं कुडवं याव ४८

तत्क्षिपेदष्टगुणं पयः। तस्यादितः क्षिपेन्नीरं खारीयावच्चतुर्गुणं। अंबुक्काथरसैर्यत्र पृथक् स्नेहस्य साध
नं। कल्कस्यांशं तत्र दद्याच्चतुर्थं षष्ठमष्टकं। दुग्धे दध्नि रसे तक्रे कल्के देयोऽष्टमांशकः। कल्कस्य सम्यक्पा
कार्थं तोयमत्र चतुर्गुणं। द्रव्याणि यत्र स्नेहेषु दध्यादीनि भवंति हि। तत्र स्नेहसमान्याहुर्यथा पूर्वं चतुर्गुणं।
क्वे द्रवेण केवलेनैव स्नेहपाको भवेद्यदि। तत्रांबुपिष्टः कल्कः स्याज्जलं चात्र चतुर्गुणं। क्वाथेन केवलेनैव पा
को यत्रेरितः क्वचित्। क्वाथ्यद्रव्यस्य कल्कोऽपि यत्र स्नेहे प्रयुज्यते। कल्कहीनस्तु यः स्नेहः स साध्यः केवले
द्रवे। पुष्पकल्कस्तु यः स्नेहस्तत्र तोयं चतुर्गुणं। स्नेहे स्नेहाष्टमांशश्च पुष्पकल्कः प्रयुज्यते। वर्त्तिवत्स्नेह
अंगुल्याऽनुपरि चालनं कार्यं — कल्कः स्यात्पदांगुल्या विवर्त्तितः। शब्दहीनोऽग्निनिःक्षिप्तः स्नेहः सिद्धो भवेत्तदा। यदा फेनोद्गमस्तैले फेन
शांतिश्च सर्पिषा। वर्णगंधरसोत्पत्तिः स्नेहसिद्धिस्तथा भवेत्। स्नेहपाकस्त्रिधा प्रोक्तो मृदुर्मध्यः खर
स्तथा। ईषत्सरसकल्कस्तु स्नेहपाको मृदुर्भवेत्। मध्यपाकस्य सिद्धिश्च कल्के नीरसकोमले। ईषत्क
ठिनकल्कस्तु स्नेहपाको भवेत्खरः। तदूर्ध्वं दग्धपाकः स्याद्दाहकृन्निःप्रयोजनः। आमपाकश्च निर्वीर्यो
वह्निमांद्यकरो गुरुः। नस्यार्थं स्यान्मृदुः पाको मध्यमः सर्वकर्मसु। अभ्यंगार्थं खरः प्रोक्तो युंज्यादेवं यथो
चितं। घृततैलगुडादींश्च साधयेन्नैकवासरे। प्रकुर्वंत्युषितास्त्वेते विशेषाद्गुणसंचयं। स्यथा। पि

रा: ४८

प्पलीपिप्पलीमूलंचव्यचित्रकनागरैः। ससैंधवैश्चपलकैः घृतप्रस्थं विपाचयेत्। क्षीरं चतुर्गुणं दत्वा तद्धृ
तं प्लीहनाशनं। विषमज्वरमंदाग्निहरंरुचिकरंपरं। क्षीरषट्पलकंघृतं॥ ॥पिप्पलीपिप्पलीमूलंचित्र
कोहस्तिपिप्पली। श्वदंष्ट्रा नागरंधान्यंपाठाविल्वंयवानिका। द्वैश्चपलिकैरेतैश्चतुःषष्टिपलं घृतं। घृता
च्चतुर्गुणं दद्याच्चांगेरीस्वरसं तु धः। तथा चतुर्गुणं दद्याद्दधिसर्पिर्विपाचयेत्। शनैःशनैर्विपक्वं च चांगेरी
घृतमुत्तमं। तद्धृतं कफवातघ्नं ग्रहणीपाण्डुविकारनुत्। हंत्यानाहं गुदभ्रंशं मूत्रकृच्छ्रं प्रवाहिकां। चांगेरी
घृतं॥ ॥मसूराणां पलशतं नीरद्रोणे विपाचयेत्। पादशेषं सुतं नीत्वा दत्वा विल्वपलाष्टकं। घृत
प्रस्थं पचेत्तेन सर्वातीसारनाशनं। ग्रहणीं भिन्नविट्कं च नाशयेच्च प्रवाहिकां। मसूराद्यं घृतं॥ ॥अश्व
गंधातुलैकास्यात्तदर्धो गोक्षुरः स्मृतः। बलामृता शालिपर्णी विदारी च शतावरी। पुनर्नवाश्वत्थशुंगा
काश्मर्यास्तु फलान्यपि। पद्मबीजं माषबीजं दद्याद्दशपलं पृथक्। चतुर्द्रोणेंभसः पक्त्वा पादशेषं सुतं न
येत्। जीवनीयगणः कुष्ठं पद्मकं रक्तचंदनं। जीवकर्षभकौ मेदा काकोल्यौ द्वे च योजितः। द्वे सर्पपर्ण्यौ जी
वंती मधुयष्ट्यादिकं गणः। पत्रकं पिप्पली द्राक्षा कपिकच्छुफलं तथा। नीलोत्पलं नागपुष्पं सारिवे द्वे त
था बला। पृथक् कर्षसमो भागः शर्करायाः पलद्वयं। रसस्य पौण्ड्रकेक्षूणामाढकैकं समाहरेत्। घृतस्य चाढ
कं दत्वा पाचयेन्मृदुनाग्निना। घृतमेतन्निहंत्याशु रक्तपित्तमुरःक्षतं। हलीमकं पांडुरोगं वर्णभेदं स्वरक्षयं। वा

लोषरू सलूनक ४९

तालमपाणाबाहुरर

पिपलकीकूंला।

रामः ४८

मेधातकमल

नरः क्षतक्षीणं मूत्रकृच्छ्रं पार्श्वशूलं च कामलां। शुक्रक्षयमुरोदाहं कार्श्यमोजःक्षयं तथा। स्त्रीणां चैवाप्रजाता
नां गर्भदं शुक्रदं नृणां। कामदेवघृतं नाम हृद्यं वल्यं रसायनं। कामदेवघृतं। त्रिफला द्वे निशे कौंती सारि रेणुका
वे द्वे प्रियंगुकं। शालिपर्णी पृश्निपर्णी देवदार्वेलवालुकं। नतं विशाला दंती च दाडिमं नागकेशरं। नीलोत्प
लैला मंजिष्ठा विडंग भद्रकुष्ठकं। जातीपुष्पं चंदनं च तालीसं ब्रहती तथा। एतैः कर्षसमैः कल्कैर्जलं दत्वा
चतुर्गुणं। घृतप्रस्थं पचेद्धीमानपस्मारे ज्वरे क्षये। उन्मादे वातरक्ते च कासे मंदानले तथा। प्रतिश्याये कटी
शूले तृतीयकचतुर्थके। घृतप्रस्थं पचेद्धीमान् मूत्रकृच्छ्रे विसर्पे च कंडूपांड्वामये तथा। विषद्वये प्रमेहे वुस
र्वेष्वेवोपयुज्यते। वंध्यानां पुत्रदं भूतयक्षरक्षोहरं परं। पानीयकल्याणकं घृतं। अमृताक्वाथकल्काभ्यां
सक्षीरं विपचेत् घृतं। वातरक्तं जयेत्याशु कुष्ठं जयति दुस्तरं। अमृताद्यं घृतं। सप्तच्छदः प्रतिविषा शं
विसलंबे म्याकः कटुरोहिणी। पाठा मुस्तमुशीरं च त्रिफला पर्पटस्तथा। पटोलनिंवमंजिष्ठा पिप्पली पद्मकेस
तुवेकीजड री। चंदनं धन्वयासश्च विशाला द्वे निशे तथा। गुडूची सारिवे द्वे च मूर्वा वासा शतावरी। त्रायंती इंद्रय
वा यष्टी भूनिंवश्चात्र भागिकाः। घृतं चतुर्गुणं दद्यात् घृताद्दामलकीरसः। द्विगुणः सर्पिषश्चात्र जल
मष्टगुणं भवेत्। तत्सिद्धं पाययेत् सर्पिर्वातरक्ते भुसर्वतः। कुष्ठानि रक्तपित्तं च रक्तार्शांसि च पांडुतां। हृद्रो
गं गुल्मवीसर्प्पौ प्रदरं गंडमालिकां। क्षुद्ररोगान् ज्वरं चैव महातिक्तमिदं जयेत्। महातिक्तकं घृतं। को

श्लो: सीसं द्वे निशे मुस्तं हरितालं मनःशिला। कंपिल्लकं गंधकं च विडंगं गुग्गुलुं तथा॥ सिक्थकं मरिचं कुष्ठं तु-
५० त्थकं गौरसर्षपान्। रसांजनं च सिंदूरं श्रीवासं रक्तचंदनं। इरिमेदं निंबपत्रं करंजं सारिवां वचां। मंजिष्ठां
छ.३ मधुकं मांसी शिरीषं लोध्रपद्मकं। हरीतकीं प्रपुन्नाटं चूर्णयेत्कार्षिकान् पृथक्। ततश्च चूर्णमालोड्य
५० त्रिंशत्पलमिते घृते। स्थापयेत्ताम्रपात्रे च घर्मे सप्तदिनानि च। अस्याभ्यंगेन कुष्ठानि दद्रूपामाविचर्चि-
का। शूकदोषा विसर्पाश्च विस्फोटा वातरक्तजाः। शिरःस्फोटोपदंशाश्च नाडीदुष्टव्रणानि च। शोथो
भगंदरश्चैव लूता प्रशमयंति देहिनां। शोधनं रोपणं चैव सुवर्णकरणं घृतं। कासीसाद्यं घृतं। जातीनिं-
बपटोलं च द्वे निशे कटुकी तथा। मंजिष्ठा मधुकं सिक्थं करंजो शीरसारिवा। तुत्थं च विपचेत्सम्यक्
कल्कैरेभिर्घृतं बुधः। अस्य लेपाच्छिरो हंति सूक्ष्मनाडीव्रणान्यपि। मर्माश्रिताः क्लेदनं च गंभीराः सरु-
जो व्रणाः॥ जात्याद्यं घृतं॥ चित्रकं शंखिनी पथ्या कंपिल्ल्यस्तुह्यता युगं। देवदारु च शम्पाको दंती दंती-
कोडीतूंवीतोरवा वंदालडोडे फलं तथा। कोशातकी देवदाली नीली च गिरिकर्णिका। शीतला पिप्पलीमूलं विडंगं कटुकी तथा। हेम-
क्षीरी च विपचेत्कल्कैरेभिः पिचून्मितैः। घृतप्रस्थं स्नुहीक्षीरं षट्पलं तु पलद्वयं। अर्कक्षीरस्य मतिमान् श्लो:
तत्सिद्धं गुल्मकुष्ठनुत्। हंति शूलमुदावर्त्तं शोथाध्मानभगंदरान्। प्रामयत्युदरान्सद्यो निपीतं बिंदुसं- ५०
ख्यया। गोदुग्धेनोष्णदुग्धेन कोलत्थेन सतेन वा। उष्णोदकेन वा पीत्वा विंदुवेगैर्विरिच्यते। एतद्धिं दु

न्यग्रोधोदुंबराश्वत्थपारिशप्लक्षपादपाः। केचित्तु पारिशस्थाने शिरीषं वेतसं परे इमे पंचवल्कलाः कथ्यंते=७

घृतं नाम्नाभिलेपाद्धि रिच्यते। बिंदुघृतं। त्रिफलाया रसः प्रस्थं प्रस्थं वासारसोद्भवं। भृंगराजरसप्र
स्थं प्रस्थमाजं पयः स्मृतं। दत्वा तत्र घृतप्रस्थं कल्कैः कर्षमितैः पृथक्। त्रिफला पिप्पली द्राक्षा चंदनं
सैंधवं बला। काकोली क्षीरकाकोली मेदा मरिच नागरं। शर्करा पुंडरीकं च कमलं च पुनर्नवा। निशायु
ग्मं च मधुकं सर्पिरेभिर्विपाचयेत्। नक्तांध्यं न कुलांध्यं च कंडूः पिल्लं तथैव च। नेत्रस्रावं च पटलं ति
मिरं चार्जुनं जयेत्। अन्येपि विविधाकारा यांति नेत्ररोगाः सुदारुणाः। त्रैफलं घृतमेतद्धि पानेन स्यादिपूचितम्।
चारक त्रैफलं घृतं। द्वे हरिद्रे स्थिरा रास्ना वांसा सारिवा चंदनद्वयं मधुयष्टी च मधुकं पद्मकेसरं पद्मकैः। उत्पलोशीर
मेदाभिस्त्रिफलापंचवल्कलैः। कल्कैः कर्षमितैरेतैः घृतप्रस्थं विपाचयेत्। विसर्पलूताविस्फोटवि
षकीटव्रणापहं। गौराद्यमिति विख्यातं सर्पिर्विषहरं स्मृतं। गौराद्यं घृतं। बलामधुकरास्नाभिर्दश
मूलफलत्रिकैः। पृथक्द्विपलकैरेभिः द्रोणनीरेण पाचयेत्। मयूरं पक्षपित्तांत्रपदास्यविवर्जितं।
पादशेषं स्रुतं नीत्वा क्षीरं दत्वा चतुःसमं। घृतप्रस्थं पचेत्सम्यक् जीवनीयैः पिचून्मितैः। तत्सिद्धं शिरसः
पीडां मन्यापृष्ठग्रहं तथा। अर्दितं कर्णनासाक्षिजिह्वागलरुजो जयेत्। पाने नस्ये तथाभ्यंगे कर्णपूरे षु
युज्यते। हेमंतकाल शिशिर वसंतेषु च सेव्यते। मयूरघृतं॥ वृषनिंबामृता व्याघ्री पटोलानां शृतेन च॥
कल्केन पक्वं सर्पिश्च निहंति विषमज्वरान्। पांडुकुष्ठविसर्पांश्च कृमीन् अर्शांसि नाशयेत्। वासादिघृतं। धा

न्यग्रोधत्वुरकं क्वाथं कल्कयुक्तं घृतं हितं। मूत्राघाते मूत्रदोषेषु शुक्रदोषे च दारुणे। धान्यकादिघृतं॥
शा० ५१ त्रिफलामधुकं कुष्ठं द्वे निशे कटुरोहिणी॥ विडंगं पिप्पलीमुस्तं विशाला कट्फलं वचा। द्वे मे
दे द्वे च काकोल्यौ सारिवे द्वे प्रियंगुका। शतपुष्पा हिंगुरास्ना चंदनं रक्तचंदनं। जातीपुष्पं तुगाक्षीरी क
मलं शर्करा तथा। अजमोदा च दंती च कल्कैरेतैश्च कार्षिकैः। जीवद्वत्सैकवर्णाया घृतप्रस्थं च गोः
क्षिपेत्। चतुर्गुणेन पयसा पचेन्मारण्यगोमयैः। सुतिथौ पुष्यनक्षत्रे मृद्भांडे नागजे तथा। ततः पिबेत्
शुभदिने नारी वा पुरुषोथवा। एतत्सर्पिर्नरः पीत्वा स्त्रीषु नित्यं वृषायते। पुत्रानुत्पादयेद्धीमान् वं
ध्यापि लभते सुतं। अल्पायुषं वा जनयेद्या च सूत्वा पुनः स्थिता। पुत्रं प्राप्नोति सा नारी बुद्धिमंतं श
तायुषं। एतत्फलघृतं नाम भारद्वाजेन भाषितं। अनुक्तं लक्ष्मणामूलं क्षिपेत्तत्र चिकित्सकः॥ बृ
हत्फलघृतं। एलाया लक्ष्मणायुक्ता या गोघृतस्याम पीतने॥ सिंहचरे द्वे त्रिफला गुडूची सपुनर्नवा। शु
कनासा हरिद्रे द्वे रास्ना मेदा शतावरी। कल्कीकृत्य घृतप्रस्थं पचेत्क्षीरे चतुर्गुणे। तत्सिद्धं पाययेत्
नारीं योनिदोषप्रशूलनिपीडितां। पीडिता चलिता या च निःसृता विवृता च या। पित्तयोनिश्च विभ्रांता राम: ५१
षंडयोनिश्च या स्मृता। प्रपद्यंते हि ताः स्थानं गर्भं गृह्णंति वासकृत्। एतत्फलघृतं नाम योनिदोषहरं
परं॥ वृषणिवास्मृता व्याघ्री पटोलानां रसतेन च। कल्केन पक्वं सर्पिस्तु कुंभीनसोसिना शयेत्॥ इति

श्रीदामोदरसूनुनाशार्ङ्गधरेण विरचितायां संहितायां घृतकल्पनाध्यायः ॥ अथ तैलानि ॥ ला १
क्षाढकं कोथयित्वा जलस्य चतुराढके ॥ चतुर्थांशं स्रुतं नीत्वा तैलप्रस्थे विनिक्षिपेत् ॥ मस्त्वाढकं च गोदु
ग्धं तत्रैव विनियोजयेत् ॥ शतपुष्पाश्वगंधा हरिद्रा देवदारु च ॥ कटुकारेणुकामूर्वाकुष्ठं च मधुयष्टि
कां ॥ चंदनं मुस्तकं रास्नां दृष्यकर्षप्रमाणतः ॥ चूर्णयेत्तत्र निःक्षिप्य साधयेन्मृदुवह्निना ॥ अस्याभ्यं
गात्प्रशाम्यंति सर्वे विविषमज्वराः ॥ कासश्वासप्रतिश्याया याप्लिक्कर्हष्टग्रहास्तथा ॥ वातपित्तमपस्मार
मुन्मादं यक्ष्मराक्षसान् ॥ कंडूं शूलं च दौर्गंध्यं गात्राणां स्फुटनं जयेत् ॥ पुष्टगर्भा भवेत्तत्स्त्री गर्भिण्यभ्यंगतो
ध्रुवं ॥ लाक्षाद्यं तैलं ॥ अश्वगंधा बला बिल्वपाटला बृहतीद्वयं ॥ श्वदंष्ट्रातिबलानिंबस्योनाकं च पुनर्न
वा ॥ प्रसारिणीमग्निमंथं कुर्याद्दशपलं पृथक् ॥ चतुर्द्रोणे जले पक्त्वा पादशेषं स्रुतं नयेत् ॥ तैलाढके
न संयोज्यं शतावर्या रसाढकं ॥ क्षिपेत्तत्र च गोक्षीरं तैलात्तस्माच्चतुर्गुणं ॥ शनैर्विपाचयेदेभिः कल्कैः
द्विपलकैः पृथक् ॥ कुष्ठैलाचंदनवचामांसीशैलेयसैंधवैः ॥ अश्वगंधाबलारास्नाशतपुष्पादेवदारु
भिः ॥ पर्णी चतुष्टयेनेव तगरेण च साधयेत् ॥ तत्तैलं नावनेभ्यंगे पानेनैव च योजयेत् ॥ पक्षाघातं हनु वस्तौ
स्तंभं मन्यास्तंभं हनुग्रहं ॥ बधिरत्वं च गतिभंगं कटिग्रहं ॥ गात्रशोषेंद्रियध्वंसं नष्टशुक्रज्वरक्ष
यीम् ॥ अंडवृद्धिं कुरंडं च दंतरोगं शिरोग्रहं ॥ पार्श्वशूलं च पांगुल्यं बुद्धिहानिं च गृध्रसीं ॥ अश्वगंधाबलावि

[illegible]

घ्नान्वातान्जयेत्सर्वांगसंश्रयान्। अस्य प्रभावाद्बंध्यापि नारी पुत्रं प्रसूयते। मर्त्यो गजो वा तुरगस्तैला
दस्मात्सुखी भवेत्। यथा नारायणो देवो दुष्टदैत्यविनाशनः। तथेदं वातरोगाणां नाशनं तैलमुत्तमं।
मध्यमनारायणं तैलं। मूलमुत्तरवारुण्याः कुट्टितं तु पलत्रयं। पलद्वादशकं तैलं द्वाणं वत्को विपाचितं।
निष्कत्रयं भक्षयेत्तु तं सेवनात्तस्य न स्यापति। हस्तकंपं शिरःकंपं सर्वांगकंपनं तथा। कंपहारितैलं॥ व
लामूलकषायेन दशमूलस्य तेन वा। कुलत्थयववकोलानां क्वाथेन पयसा तथा। अष्टांशभागयु
क्तेन भागमेकं च तैलतः। गणेन जीवनीयेन शतवर्येन्द्रवारुणी। मंजिष्ठाकुष्ठशैलेयतगरागुरुसैं
धवैः। वचापुनर्नवामांसीसारिवाह्वयपत्रकैः। शतपुष्पाश्वगंधाभ्यां मेलया च विपाचयेत्। गर्भा
र्थिनीनां नारीणां पुंसां च क्षीणरेतसां। व्यायामक्षीणगात्राणां सूतकानां च युज्यते। राज्ञां योग्य
मिदं तैलं सुखिनां च विशेषतः। बलातैलमिति ख्यातं सर्ववातामयापहं। बलातैलं॥ प्रसारिणी
पलशतं जलद्रोणेन पाचयेत्। पादशिष्टः सतोयाश्च तैलं दधि च तत्समं। कांजिकं च समं तेन क्षी
रं तैलाच्चतुर्गुणं। तैलात्तथाष्टमांशेन सर्वकल्कानि योजयेत्। मधुकं घस मतनं क्षारं पिप्पलीमू
लं चित्रकं सैंधवं वचा। प्रसारिणीदेवदारुरास्नाचगजपिप्पली। भल्लातः शतपुष्पा च मांसी चेति
विपाचयेत्। एतत्तैलवरं पक्वं वातश्लेष्मामयान्जयेत्। कौब्जं खांजत्वपंगुत्वं गृध्रसीमर्दितं त

श्रु॰ प्र॰ विसर्लूसा
५८

ए.म:
५२

कपूरकचरी

ष्या। हन्तुष्टिसिद्धिरोगी वा कुष्ठिमं च नाशयेत्॥ अन्यांश्च विषमान्सर्वान्सर्वानाशु व्यपोहति।
प्रसारिणीतैलं। चंदनं तु नरवं वा पद्मकं च शैलेयपद्मकं मंजिष्ठा सरलं दारु सव्येलो शतकेशरं। प चीक
त्रं तैलं मुरा मांसी कंकोलं वनितांबुदं। हरिद्रे सारिवे तिक्ता लवंगागुरुकुंकुमं। त्वग्रेणुकारामिस्तैलं
मस्तु चतुर्गुणं। लाक्षारससमं सिद्धं हृद्यं च वलवर्णकृत्॥ अपस्मारज्वरोन्मादं कृत्यालक्ष्मीज्वराप
हं। आयुः पुष्टिकरं चैव वशीकरणमुत्तमं। चंदनाद्यं तैलं॥ माषाः यवातसी कुष्ठं मर्कटी च कुरंटकः।
गोकंटकः ऋद्धकश्चैषां कुर्यात्प्रस्थपलं पृथक्। चतुर्गुणं तु नापक्कं पादशेषं सुतं नयेत्॥ काश्मी
सकास्थि वदरं शणबीजं कुलत्थकं। पृथक् चतुर्दश पलं चतुर्गुणजले पचेत्। चतुर्थांशावशिष्टं तु तत्र क्रीयात्
क्वाथमुत्तमं प्रस्थैकं छागमांसश्च चतुःषष्टिपले जले। अष्टिप्यपाचयेद्धीमान् पादशेषं सुतं नयेत्। तैल
प्रस्थं ततः क्वाथान् सर्वानेतान् विनिक्षिपेत्। कल्कैरेभिश्च विपचेत् अमृता कुष्ठनागरैः। रास्नापुनर्नवैरंडैः
पिप्पल्या शतपुष्पया। वलाप्रसारिणीभ्यां च मांस्याकटुकया तथा। पृथगर्द्धपलैरेतैः साधयेन्मृदुनाग्नि
ना। हन्त्यात्तैलमिदं शीघ्रं ग्रीवास्तंभापवाहुकौ। अर्द्धांगशोषमाक्षेपमूरुस्तंभापतानकौ। शाखाकंपशिरःकं
पविश्वाचीमर्दितं तथा। माषादिकमिदं तैलं सर्ववातविकारनुत्॥ माषाद्यं तैलं॥ शतावरी वलायुग्मं पलपर्णी
गंधर्वहस्तकः। अश्वगंधाश्वदंष्ट्रा च विल्वः कास कुरंटकः। एषां सार्द्धपलान् भागान् कल्पयेच्च विपाचयेत्।

पाशः१ पीलावांसी२

शा. चतुर्गुणेन नीरेण पादशेषं सुतं नयेत्। नियोज्य तैलप्रस्थे च क्षीरे द्वे प्रस्थे विनिक्षिपेत्। शतावरीरसप्रस्थं
५३ जलप्रस्थं नियोजयेत्। शतावरीदेवदारुमांसीतगरचंदनं। शतपुष्पा बलाकुष्ठमेला शैलेयमुत्पलं। रु
53 द्धिर्मेदा च मधुकं काकोली जीवकस्तथा। एषां कर्षमितैः कल्कैस्तैलं गोमयवह्निना। पचेच्च मृदु तैले
न नरः स्त्री शुद्धवायते। नारी च लभते पुत्रं योनिशूलं च नश्यति। अंगशूलं शिरःशूलं कामलां पांडु
तां क्षयं। गृध्रसीप्लीहशोषांश्च मेहानृद्धापतानकं। सदाहं वातरक्तं च वातपित्तं मदार्दितं। असृग्द
रं तथा ध्मानं रक्तपित्तं निरस्यति। शतावरीतैलमिदं कृष्णात्रेयेण भाषितं। ॐ नारायण्यै स्वाहा।
उत्तराभिमुखो भूत्वा खनेत् खदिरशंकुना। ॐ सर्वव्याधिसाधनीये स्वाहा। इत्युत्पाटनमंत्रः॥ ॐ कुमार
जीवनीये स्वाहा। इति पाचनमंत्रः। शतावरी दिव्यौषधी। वाजीकरं शतावरी तैलं। द्विप्रस्थसार्षपं तै
लं प्रस्थेकं तिलतैलकं। एरंडकितवार्कस्य शेफाली वरुणं तथा। अश्वगंधा महानिंबरास्ना [illegible] भृं
ग शतावरी। एतानि पलमात्राणि पिष्ट्वा गोमयतद्रसैः। वस्त्रपूतेन स्वरसैः शनैर्मृद्वग्निना। गुंजा
द्रसं वंदाकं च पलं पंच प्रदापयेत्। जातीफलं देवपुष्पं त्रिकटु मुस्तकं तथा। मांडेरी श्रुलकंदा मांसे द्रु शम:
लारक्तचंदनं। देवद्रुमनिशादारु पुष्करं कुष्ठमेव च। मंत्स्यपित्ता जवानी च विडंगं कंदभी सटी। त्व
क्पत्रसैंधवं लोध्रं कटूफलं शतपुष्पजा। एतानि कर्षमात्राणि कल्कं कृत्वा विपाचयेत्। पंच विंश ५३

तिशूलेन निर्विषं तत्र विनिक्षिपेत्। विषगर्भमिदं ख्यातं तैलं पामामयापहं। वाधर्य्यं गतिभंगं च ल
लल्लं च कंपग्रहं। अर्द्धितं च हनुस्तंभं मन्यास्तंभं जवासकं। अर्द्धांगं शुष्यते यस्य कुब्जा वा वंचपंगुता
। विशेषेण हिता नारी सूतकादोषनाशनं। इति विषगर्भ। कासीसं लांगलीकुष्टं शुंठीकृष्णा च सैंध कलहारर
वं। मनःशिलाश्वमारश्च विडंगं चित्रकोदंतकः। दंतीकोशातकीबीजं हेमाक्षाहरितालकः। कल्कैः क
र्षमितैरेतैस्तैलं प्रस्थं विपाचयेत्। सुधार्कपयसी दद्यात् पृथक् द्विपलसम्मितैः। चतुर्गुणं गवां मू
त्रं दत्वा सम्यक् प्रसाधयेत्। कथितं त्वरनादेन तैलमर्शोविनाशनं। क्षारवत्पातयत्येतद् अर्शांसि सम्य
गतो भृशं। वलीन् दूषयत्येतत् क्षारकर्मकरं स्मृतं। अर्शोघ्नी। कासीसाद्यं तैलं। मंजिष्ठा सारिवा सर्ज
यष्टी सिक्थैः पयोन्वितैः। पिंड्याख्यं साधयेत्तैलमभ्यंगात् वातरक्तनुत्। वातरक्ते पिंडतैलं। अर्कपत्ररस
से पक्वं हरिद्राकल्कसंयुतं। नाशयेत्सार्षपं तैलं पामाकच्छुविचर्चिकां। पामायामर्कतैलं। मरिचं हरि
तालं च त्रिवृत् तं रक्तचंदनं। मुस्तं मनःशिला मांसी हरिद्रे देवदारु च। विशालाकरवीरं च कुष्टमर्कपयः
स्तथा। तथैव गोमयरसं कुर्यात् कर्षमितं पृथक्। विषं चार्द्धपलं देयं प्रस्थं च कटुतैलकं। गोमूत्रं द्विगुणं
दद्याज्जलं च द्विगुणं भवेत्। मरिचाद्यमिदं तैलं सिद्धं कुष्टप्रनाशनं। जयेत्सर्वाणि कुष्टानि पुंडरीकं वि
चर्चिकां। पामां सिध्मानि रक्तार्शः कंडूकच्छुव्रणान्यपि। मरिचादितैलं। सिंदूरार्द्धपलं पिष्ट्वा जीरकं

रसा. ५४ सपलं तथा ॥ कटुतैलं पचेद्द्वाभ्यां समांशेन पलाष्टकं ॥ इदं वैद्योपदेशेन सद्यः पामाहरं परं ॥ त्रिफलारिष्टभूनिं-
बं द्विनिशो रक्तचंदनं ॥ एतैः सिद्धमरूषीणां तैलमभ्यंजने हितं ॥ अरूंषिकायां ॥ त्रैफलं तैलं ॥ भावयेन्निंबवी-
जानि भृंगराजरसेन हि ॥ तथासनस्यतोयेन तत्तैलं हंति नस्यतः ॥ अकालपलितं सद्यः पुंसां दुग्धान्नभो-
कृ४सा जिनां ॥ पलितहरं निंबतैलं ॥ यष्टीमधुकधात्रीभ्यां तथा धात्रीफलैः सृतं ॥ तैलं नस्ये कृतं कुर्यात्केशान्
श्मश्रूणि सर्वशः ॥ केशप्ररोहे यष्टीमधुकतैलं ॥ करंजस्य चित्रकोजाती कुरवीरस्य पाचितं ॥ तैलमेभि- नमैआमलाका सोगणारस ७-
वा. लमये र्दुतं हन्यादभ्यंगादिंद्रलुप्तकं ॥ इंद्रलुप्ते करंजाद्यं तैलं ॥ नीलिकाकेतकीकंदभृंगराजकुरंटकाः ॥ त-
थार्जुनस्य पुष्पाणि बीजकं कुसुमं तथा ॥ कृष्णा तिलाश्च तगरं समूलं कमलं तथा ॥ प्रियोरंजः प्रि- रास्नादिः फुलकिरमड
कमलके हेठकी मिटी वा तलावकी काली मिटी = ५ तेलतें चौगुना ४ जिक्काके हेठ होरजिक्री = २ यंगुश्च दाडिमत्वक् गुडूचिका ॥ त्रिफलापद्मपंकश्च कल्कैरेभिः पृथक् पृथक् ॥ कर्षमात्रैः पचेत्तैलं
त्रिफलाक्वाथसंयुतं ॥ भृंगराजरसेनैव सिद्धं केशांतरीकृतं ॥ अकालपलितं हंति दारुणं चोपजि- स्थिरीकरं
ह्विकां ॥ दारुणे नीलिकाद्यं तैलं ॥ भृंगराजरसेनैव लोहकिट्टं फलत्रिकं ॥ सारिवां च पचेत्कल्कैस्तैलं दिः
दारुणनाशनं ॥ अकालपलितं कंडूमिंद्रलुप्तं च नाशयेत् ॥ भृंगराजतैलं ॥ ह्रुबुमूलं नतं यष्टी जयंती- रामः
सैंधवं मिसिः रास्ना भृंगं विडंगं च शुंठी चेभिः प्रसाधितं ॥ अजाक्षीरेणाभ्यंगस्य चतुर्गुणरसेन चाति ५४

लानामतिष्ठस्थानां तैलमेभिर्विपाचयेत्। तस्य गडूंद्वो नाम मनाशयंति द्विरोगदान्। कुर्या
त्केशान् श्मश्रुदंतांश्च पलितं च महाहृदान्। गंधस्येवाधिके दृष्टिर्गातं गसमदोवलः। गडूंदुतैलं।
इरिमेदत्वचं क्षुन्नां पचेच्छतपलोन्मितां। जलद्रोणेन तत्क्वाथं पंग्र नीयात्साद्धिपिवितां तैलस्यार्द्धा
ढकं दत्वा कल्कैः कर्षमितैः पचेत्। इरिमेदलवंगाभ्यां गैरिकागुरुपद्मकौ। मंजिष्ठालोध्रमधुके
लाक्षान्यग्रोधमुस्तकैः। त्वक्जातीफलकर्पूरकंकोलखदिरैस्तथा। पतंगधातकीपुष्पसूक्ष्मै
लानागकेसरैः। कट्फलेन च संसिद्धं तैलं मुखरुजं जयेत्। दुष्टमांसं चलान् शीतादं दंतचशो
षिरं। शीतदंतं दंतहर्षं विद्रधिं कृमिदंतकं। दंतस्फुटनदौर्गंध्यं जिह्वातात्वोष्ठजां रुजां। इरिमेदा
द्यं तैलं। जातीनिंबपटोलानां नक्तमालस्य पल्लवाः। सिक्थं च समधुकं कुष्ठं द्वे निशे कटुरोहिणी। म
जिष्ठा पद्मकं लोध्रमभया नीलमुत्पलं। तुत्थकं सारिवाबीजं नक्तमालफलानि च। एतानि सम
भागानि पिष्ट्वा तैलं विपाचयेत्। विषव्रणे समुत्पन्ने स्फोटके कच्छ्रो गिभु दद्रु वीसर्प्परोगेषु
कीटदंष्ट्रेषु सर्वथा। सद्यः शस्त्रप्रहारेषु दिग्धविद्धेषु चैव हि। नखदंतक्षते दुष्टे देहमांसापव
र्णके। जात्यादिकमिदं तैलं शोधनं रोपणं तथा। इति जात्यादितैलं। हिंगुतुंबरुसुंठीभिः कटुतैलं

शा॰
५५

विपाचयेत्। नस्यपूरणमात्रेण कर्णशूलं प्रणश्यति। कर्णशूले हिंग्वाद्यं तैलं। बालबिल्वानि गोमूत्रैः पि
ष्ट्वा तैलं विपाचयेत्। आजं क्षीरं सनीरं च बाधिर्ये कर्णहरणं। बाधिर्ये बिल्वतैलं। बालमूलकशुंठीनां या
वक्षारः पुतं तथा। लवणानि च पंचैव हिंगुशिग्रुमहौषधं। देवदारु वचा कुष्ठं शतपुष्पा रसांजनं। ग्रंथि
कं भद्रमुस्तं च कल्कैः कर्षमितैः पृथक्। तैलप्रस्थं च विपचेत् कदलीबीजपूरयोः। रसाभ्यां मधुसूक्ते
न चातुर्गुण्यमितेन वा। शूलपक्वावं कर्णनादं शूलं बधिरतां कृमीन्। अन्यांश्च कर्णजान् रोगान् मुखरो
गांश्च नाशयेत्। क्षारतैलं। जंबीराणां फलरसः प्रस्थैकं कुडवोन्मितं। माहिकं तत्र दातव्यं पलैका
पिप्पलीसंयुता। एतदेकीकृतं सर्वं मधुभांडे निधापयेत्। धान्यराशौ स्थितं मासं मधुशुक्तं मुदाहृतं। म
धुसुक्तक्षारतैलविधानं कर्णमुखरोगा। पाठाद्वि च निशा मूर्वा पिप्पली जातिपल्लवैः। दंत्या च तैलं संसि
द्धं नस्यं स्यात् दुष्टपीनसे। पाठाद्यं तैलं। व्याघ्री दंती वचा शिग्रु तुलसी व्योषसैंधवैः। एतैर्विपाचितं तैलं
पूतिनासागदापहं। व्याघ्रीतैलं नासारोगे। कुष्ठं बिल्वं वचा शृंगी द्राक्षा कल्ककषायवत्। साधितं तैल
माज्यं वा नस्यात् क्षयपीनसनाशनं। कुष्ठतैलं। गृहधूम कणा दारु क्षारनक्तकसैंधवैः। सिद्धं शिरीषबी
जैश्च तैलं नासार्शसां हितं। गृहधूमतैलं नाशार्शसि। वज्रीक्षीरं रविक्षीरं इंद्रवं धत्तूर चैत्रकं। महिषी
विट्भवं द्रावं सर्वैः संतिलतैलकं। पचेत्तैलावशेषं च गोमूत्रे च चतुर्गुणे। तैलावशेषं पक्वा च तत्तैलं

पंचद्रवेभ्यः चतुर्थांसंपलं=१ पक्वकं द्विः २

बलादिः २
पिप्पलीमूलं=३
चूकेसाककारस४
जपालगोटकी...
३=१
वीणा मयूरबीजैः द्विः
शम:
५५

मनःशिला   मिश्र   कैडीतुंबी   त्रिकुट

प्रस्थमात्रकं । गंधकाग्निशिला तालं विडंगातिविषा विषा । तिक्तकोशातकी कुष्ठवचामांसीकटुत्रयं ।
दारुहलदर प्रीतदारु च यष्ट्याह्वं स्वर्जिका जीरजीरकं । देवदारु च कर्षांशं चूर्णं तैले विनिक्षिपेत् । वज्रतैलमिदं ख्या-
तमभ्यंगात्सर्वकुष्ठजित् । वज्रतैलं सर्वकुष्ठहरं । करवीरशिफादंतीत्रिवृत्कोशातकीफलं । रंभाक्षारोद- केलेकीरषका जलर
कैस्तैलं पक्वं शस्तं लोमनाशनं । करवीरादितैलं ॥ ॥इति श्री शार्ङ्गधरेण विरचितायां संहितायां चिकि-
त्सास्थाने तैलकल्पनाध्यायः ॥ ॥द्रवेषु चिरकालस्थं द्रव्यं यत्संधितं भवेत् । आसवारिष्टभेदैस्तु प्रो-
च्यते भिषजोचितं । यदपक्वौषधांबुभ्यां सिद्धं मद्यं स आसवः । अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं पलो-
न्मितं । अनुक्तमानारिष्टेषु द्रवद्रोणं गुडात्तुलां । क्षौद्रं क्षिपेद्गुडादर्धं प्रक्षेपं दशमांशिकं । ज्ञेयः शीतर-
सः सीधुरपक्वमधुरद्रवैः । सिद्धः पक्वरसः सीधुः संपक्वमधुरद्रवैः । परिपक्वान्नसंधानसमुत्पन्नां सु-
रां जगुः । सुरामंडः प्रसन्ना स्यात्ततः कादंबरी घना । पुनर्नवा शालिपिष्टैर्विहिता वारुणी मता । तदधो ज-
गलो ज्ञेयो मेदको जगलाद्घनः । पक्कसो हृतसारः स्यात्सुराबीजं च किण्वकं । यत्तालखर्जूररसैः संधि-
ता सा हि वारुणी । कंदमूलफलादीनि सस्नेहलवणानि च । यत्र द्रवेभिषूयंते तत्सूक्तमभिधीयते । विर-
स्थमम्लतां यातं मद्यं मिष्टुरसद्रवैः । विनष्टः संधितो यस्तु तच्चुक्रमभिधीयते । गुडांबुना सतैलेन कंदशा-
कफलैस्तथा । संधितं वाम्लतां यातं गुडशुक्तं प्रचक्षते । एवमेवेक्षुशुक्तं स्यान्मृद्वीकासंभवं तथा । तुषां-

मा मैः डि:

तुसंधितं ज्ञेयं माषैर्विदलितैर्यवैः । यवैस्तु निस्तुषैः पक्वैः सौवीरं साधितं भवेत् । कुल्माषधान्यमंडादिसं

धा. ५६ धितं कांजिकं विदुः । शंडाकी संधिता ज्ञेया मूलकैः सर्षपादिभिः । अथासवः । उशीरं वालकं पद्मं काश्मरीं कमलकडेडेवापो सकेडोडेर

नीलमुत्पलं । प्रियंगु पद्मकं लोध्रं मंजिष्ठा धन्वयासकं । पाठा किराततिक्तं च न्यग्रोधोदुंबरं सटी । पर्प

कचनालीकाजल टं पुंडरीकं च पटोलं कांचनारकं । जंबूशाल्मलिनिर्यासं प्रत्येकं पलसंमितान् । भागान् विचूर्णितान्

कृत्वा द्राक्षायाः पलविंशतिः । धातकी षोडशपलां जलद्रोणद्वये क्षिपेत् । शर्करायास्तुलां दत्वा क्षौद्र

स्यैकतुलां तथा । मासं च स्थापयेद्भांडे मांसीमरिचधूपिते । उशीरासव इत्येष रक्तपित्तनिवारणः । पां

डुकुष्ठप्रमेहार्शः कृमिशोथहरस्तथा । इति उशीरासवः । पिप्पलीमरिचं चव्यं हरिद्रा चित्रको घनः । वि

डंगं क्रमुको लोध्रः पाठा धात्र्येलवालुकं । उशीरं चंदनं कुष्ठं लवंगं तगरं तथा । मांसीलकपेलवं पत्रं

प्रियंगुर्नागकेशरं । जातीफलानि कंकोलमेलां चैव प्रदापयेत् । एषामर्द्धपलान् भागान् सूक्ष्मचूर्ण

कृतान् शुभान् । जलद्रोणद्वये क्षिप्त्वा दद्याद्गुडतुलात्रयं । पलानि दश धातक्या द्राक्षा षष्टिपलं भवेत् ।

एतान्येकत्र संयोज्य मृद्भांडे च विनिक्षिपेत् । शालाजातरसं सर्वं पाययेदग्न्यपेक्षया । क्षयं गुल्मोदरं का राम: ५६

र्श्यं ग्रहणीं पांडुतां तथा । अर्शांसि नाशयेच्छीघ्रं पिप्पल्याद्यासवस्त्वयं । पिप्पल्याद्यासवः । लोहचूर्णं त्रि

कटुकं त्रिफलां च यवानिकां । विडंगं मुस्तकं चित्रं चतुःसंख्यापलं पृथक् । चूर्णीकृत्य ततः क्षौद्रं चतुःष

(त्व)क्पलं क्षिपेत् ॥ दद्याद्गुडतुलां तत्र जलद्रोणद्वयं तथा । घृतभांडे विनिःक्षिप्य निदध्यान्मासमात्रकं ॥ लो
हासवो सवमनुं मर्त्यैः पिबेद्वह्निकरं परं ॥ पांडुश्वयथुगुल्मानि जठराण्यर्शसां रुजां ॥ कुष्ठं प्लीहामयं कंडूः
कासं श्वासं भगंदरं ॥ अरोचकं च ग्रहणीं हृद्रोगं च विनाशयेत् ॥ इति लोहासवः ॥ अथारिष्टाः ॥ तुलां कुटज
मूलस्य मृद्वीकार्द्धतुलां तथा ॥ मधूकपुष्पाः काश्मर्यो भागान्दशपलोन्मितान् ॥ चतुर्द्रोणेम्भसः पक्त्वा
क्वाथे द्रोणावशेषिते ॥ धातक्या विंशतिपलं गुडस्य च तुलां क्षिपेत् ॥ मासमात्रं स्थितो भांडे कुटजारि
ष्टसंज्ञितः ॥ ज्वरान्प्रशमयेत्सर्वान्कुर्यात्तीक्ष्णं धनंजयं ॥ कुटजारिष्टः ॥ विडंगग्रंथिकं रास्नां कुट
जत्वक्फलानि च ॥ पाठैलावालुकं धात्री भागान्पंचपलान्पृथक् ॥ अष्टद्रोणेम्भसः पक्त्वा कुर्याद्द्रोणा
वशेषितं ॥ पूते शीते क्षिपेत्तत्र क्षौद्रं पलशतत्रयं ॥ धातकीविंशतिपलं त्रिजातं द्विपलं तथा ॥ प्रियंगु
काचनारारणां सलोध्राणां पलं पलं ॥ व्योषस्य च पलान्यष्टौ चूर्णीकृत्य प्रदापयेत् ॥ घृतभांडे विनिःक्षि
प्य मासमेकं विधारयेत् ॥ ततः पिबेद्यथाग्नि तु जयेद्विद्रधिमूर्छितं ॥ ऊरुस्तंभाश्मरीमेहान्प्रत्यष्ठीलां भ
गंदरं ॥ गंडमालां हनुस्तंभं विडंगारिष्टसंज्ञकः ॥ विडंगारिष्टः ॥ तुलार्द्धं देवदारुः स्याद्वासा च पलविंशतिः
॥ मंजिष्ठेंद्रयवा दंती तगरं रजनीद्वयं ॥ रास्ना क्रिमिघ्नमुस्तं च शिरीषं खदिरार्जुनौ ॥ भागान्दशपलान्दद्या
द्यवान्यावत्सकस्य च ॥ चंदनस्य गुडूच्याश्च रोहिण्याश्चित्रकस्य च ॥ भागानष्टपलानेताननष्टद्रोणे

कुटकी त्वचा मीक
लमी = १
वस्त्रगालितेद्द
पलं क्षि:

जयेद्विद्रधि मुष्टि
तद्धि: = ४

लगे लापत्रजं ह

पूर्वेत (interlinear) धातकेकुह (interlinear)

रा भसः क्षिपेच्चैतत् द्रोणशेषे कषाये च पूते शीते प्रदापयेत्। धातक्याः षोडश पलं माक्षिकस्य तुलात्रयं। व्योषस्याद्वि
५७ पलं दद्यात् त्रिजातात्त्व चतुःपलं। चतुःपलं प्रियंगुश्च क्षिपलं नागकेशरं। सर्वाण्येतानि संचूर्ण्य घृतभांडे विधार
येत्। मासादूर्ध्वं पिबेदेनं समे ह्यहनि दुर्जयं। वातरोगान्यहत्यर्शो मूत्रकृच्छ्राणि नाशयेत्। देवदार्व्यादि को
रिष्टो दद्रुकुष्ठविनाशनः। देवदार्व्वारिष्टः। खदिरस्य तुलार्द्धं तु देवदारु च तत्समं। वाकुची द्वादशपला
दार्व्वीस्या स्पलविंशतिः। त्रिफला विंशतिपलान्यष्टद्रोणेंभसः पचेत्। कषाये द्रोणशेषे च पूते शीते विनिः
क्षिपेत्। तुलाद्वयं माक्षिकस्य तुलैका शर्करा तथा। धातक्या विंशतिपलं कंकोलं नागकेशरं। जातीफ
त्रैलवंगैलात्वक्पत्राणि ष्टपकृष्टकाः पलोन्मितानि कृष्णायाः दद्यात्पलचतुष्टयं। घृतभांडे विनिःक्षि
प्य मासादूर्ध्वं पिबेत्ततः। महाकुष्ठानि हृद्रोगं पांडुरोगार्बुदे तथा। गुल्मं ग्रंथिं कृमीन्कासं तथा प्लीहोदरं
किंकर (interlinear)
जयेत्। एवं खदिरारिष्टः सर्वकुष्ठनिवारणः। खदिरारिष्टः। तुलाद्वयं चव्वं कूल्याश्चतुर्द्रोणजले क्षिपे
त्। द्रोणशेषे रसे शीते गुडस्य त्रितुलां क्षिपेत्। धातकी षोडशपला कृष्णा च द्विपलांशतो। जातीफलानि
कंकोलमेला त्वक्पत्रकेशरं। लवंगं मरिचं चैव पलिकान्युपकल्पयेत्। मासं भांडे स्थितस्त्वेष बब्बूल्यारिष्ट रामः
को जयेत्। क्षयं कुष्ठमतीसारं प्रमेहं श्वासकासकान्। बब्बूल्यारिष्टः। द्राक्षा तुलार्द्धं द्विद्रोणजलस्य विपचे ५७
त्सुधीः। पादशेषे कषाये च पूते शीते विनिक्षिपेत्। गुडस्य द्वितुलां तत्र त्वगेलापत्रकेशरं। प्रियंगु मरिचं कृ

ष्मा विडंगं चेति चूर्णयेत्। एषां पृथक् पलोन्मितैर्भागैस्ततो भांडे निधापयेत्। मासं ततो ह्युद्धृत्य पिबेत्प्रा

तारसं ततः। उरःक्षतं क्षयं हंति कासश्वासगलामयान्। द्राक्षारिष्टः क्रमयः ओजो बलवन्मलशोधनं। द्राक्षा

रिष्टः। रोहीतक तुलामेकां चतुर्द्रोणे जले क्षिपेत्। पादशेषे रसे पूते प्पीते पलशतद्वयं। दद्याद्गुडस्य धा

पिप्पलीपिप्पलीमूलचव्यचित्रकनागरैः। पंचकोलं एलात्वक्पत्रजैः। हरीतकीविभीतकधात्रीभिस्त्रिफला। ४

तक्याः पलषोडशका मता। पंचकोलं त्रिजातं च त्रिफलां च विनिक्षिपेत्। चूर्णयित्वा पलांशेन ततो भां

डे निधापयेत्। मासादूर्ध्वं च पिबतां गुदजा यांति संक्षयं। ग्रहणीपांडुहृद्रोगप्लीहगुल्मोदराणि च। कु

ष्ठशोफारुचिहरो रोहीतारिष्टसंज्ञकः। रोहीतारिष्टः। पल्यौ बृहत्यौ गोकंटो बिल्वोग्निमथ्योनोरलुः।

पाटला काश्मरी चैव दशमूलमिहोच्यते। दशमूलानि कुर्वीत भागैः पंचपलैः पृथक्। पंचविंशपलं

कुर्याच्चित्रकं पुष्करं तथा। कुर्याद्विंशपलं लोध्रं गुडूचीं तत्समं भवेत्। पलैः षोडशभिर्धात्री रविसंख्यैर्दु

विजयसार ५ जवासा

रालभा। खदिरो बीजसारश्च पथ्या चेति पृथक्पलैः। अष्टभिर्गुणितं कुष्ठं मंजिष्ठा देवदारु च। विडं

गं मधुकं भार्गी कपित्थोऽक्षः पुनर्नवा। चव्यं मांसी प्रियंगुश्च सारिवा कृष्णजीरकः। त्रिवृता रेणुकं रास्ना

पिप्पली क्रमुकं सठी। हरिद्रा शतपुष्पा च पद्मकं नागकेशरं। मुस्तमिंद्रयवाः शुंठी जीवकर्षभकौ त मिंद्रयवाः

था। मेदा चान्या महामेदा काकोल्यौ ऋद्धिवृद्धिके। कुर्यात्पृथक् द्विपलिकान्पचेदष्टगुणे जले। चतु मगोद्धिः

र्थांशं शृतं नीत्वा भांडे संनिधापयेत्। ततः षष्टिपलां द्राक्षां पचेन्नीरे चतुर्गुणे। त्रिपादशेषं शीतं च पू

शा०
५८
58

वं क्वाथे सृतं क्षिपेत्। द्वात्रिंशत्पलकं द्राक्षा गुडस्य तु पलानि। त्रिंशत्पलानि धातक्याः कंकोलं जलचंद

नं। जातीफलं लवंगं च त्वगेलापत्रकेशरं। पिप्पली चेति संचूर्ण्य भागैर्द्विपलिकैः पृथक्। शाणमात्रां च

कस्तूरीं सर्वमेकत्र निक्षिपेत्। भूमौ निधापयेज्जातु ततो जातरसं पिबेत्। कतकस्य फलं क्षिप्त्वा रसं नि

र्मलतां नयेत्। ग्रहणीमरुचिं शूलं श्वासं कासं भगंदरं। वातव्याधिं तथा छर्दिं पांडुरोगं च कामलां। तयं४

कुष्ठान्यर्शांसि मेहांश्च मंदाग्निमुदराणि च। शर्करामश्मरीं मूत्रकृच्छ्रं धातुक्षयं जयेत्।। कृशानां पु

ष्टिजननो वंध्यानां गर्भदः परः। अरिष्टो दशमूलाख्यस्तेजःशुक्रबलप्रदः।। दशमूलाद्यरिष्टः।।

।। इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने आसवारिष्टक

ल्पना नाम अष्टादशोऽध्यायः।१८।। ।। अथ धातुशोधनम्।। स्वर्णं तारं ताम्रं लोहं नागं वं पित्तलं६

गौ च तीक्ष्णकं। धातवः सप्त विज्ञेयास्ततस्तान् शोधयेद्बुधः। स्वर्णतारारताम्राणां पत्राण्यग्नौ प्र

तापयेत्। निक्षिपेत्तप्ततप्तानि तैले तक्रे च कांजिके। गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रिधा।

एवं स्वर्णादिलोहानां विशुद्धिः संप्रजायते। नागवंगौ प्रतप्तौ च गालितौ तौ निषेचयेत्। त्रिधा त्रि रामः

२ स्वर्णतेपारदूला धा विशुद्धिः स्याद्रविदुग्धेऽपि च त्रिधा। अथ धातुवधे स्वर्णमारणं। स्वर्णस्य द्विगुणं सूतमम्लेन स ५८

अष्टकाबुध--२ ह मर्दयेत्। तद्गोलकसमं गंधं निदध्यादधरोत्तरं। गोलकं च ततो रुद्ध्वा शरावद्वयसंपुटे। त्रिंश

ध्वनोपलैर्दद्यात्पुटान्येवं चतुर्दश। निरुत्थं जायते भस्म गंधो देयः पुनः पुनः॥ अथापरो विधिः॥ कांच
नेगालिते नागं षोडशांशेन निक्षिपेत्। चूर्णयित्वा तथाम्लेन घृष्ट्वा कृत्वा च गोलकं। गोलकेन समं गं
धं दद्याच्चैवाधरोत्तरं। शरावसंपुटे धृत्वा पुटेत्त्रिंशद्वनोपलैः। एवं सप्तपुटैर्हेम निरुत्थं भस्म जायते पचेत्त्रिंशद्व नोपलैः॥
।अन्यच्च। कांचनाररसैः घृष्ट्वा समं सूतकगंधयोः। कज्जलीं हेमपत्राणि लेपयेत्सममात्रया। कांच
नारित्वचः कल्कमूषायुग्मं प्रकल्पयेत्। धृत्वा तत्संपुटे गोलं मृन्मूषासंपुटे पचेत्। निधाय संधि
रोधे च कृत्वा संशोष्य एव च। वह्निं खरतरं कुर्यादेवं दद्यात्पुटत्रयं। निरुत्थं जायते भस्म सर्वकार्ये
कलहारी=१ षु योजयेत्। कांचनारिप्रकारेण लांगलीं हंति कांचनं। ज्वालामुखी तथा हन्यात्तथा हंति मनःशिला॥ सर्पकाल=१
मनसिल अन्यदपि। शिलासिंदूरयोश्चूर्णं समयोरर्कदुग्धकैः। सप्तैव भावना दद्यात्तच्छोषयेच्च पुनः पुनः। तत
सिंदूरयोः स्तु गालिते हेम्नि कल्कोयं दीयते समः। पुनर्धमेत्तितरं यथा कल्को विलीयते। एवं वेलात्रयं दद्या
समभागाय त्कल्कं हेम मृतिर्भवेत्। तथा चापारावतमलैर्लिंपेद्वा कुक्कुटोद्भवैः। हेमपत्राणि तेषां च प्रदद्या
अर्कदुग्धेन कुल्हलीयांक दंतरांतरं। गंधचूर्णं समं धृत्वा शरावयुगसंपुटे। प्रदेया कुक्कुटपुटं पंचभिर्गोमयोपलैः। एवं नवपु
देश्वविरा=६ टं दद्यात्दशमं च महापुटं। त्रिंशद्वनोपलैर्देयं जायते हेमभस्मतां। तारमारणं। भागैकं तालकं मर्द गंधकः=२
यामेनाम्लेन केनचित्। तेन भागत्रयं तारपत्राणि प्रदिलेपयेत्। धृत्वा मूषापुटे रुध्वा पुटेत्त्रिंशद्वनो
हरिताल=२

पलैः। समुद्धृत्य पुनस्तालं दत्वा रुध्वा पुटे पचेत्। एवं चतुर्दश पुटैस्तारं भस्म प्रजायते। अन्यच्च। स्नुहीक्षी
शा॰ रेण संपिष्टं माक्षिकं तेन लेपयेत्। तालकस्य प्रमाणेन तारपत्राणि बुद्धिमान्। एवं चतुर्दश पुटैस्तारं भस्म
५९ प्रजायते। अथ ताम्रमारणं। सूक्ष्माणि ताम्रपत्राणि कृत्वा संशोधयेद्बुधः। वासरत्रयमम्लेन ततः
59 खल्वे विनिक्षिपेत्। पादांशं सूतकं दत्वा यामम्लेन मर्दयेत्। ततो ऊर्द्धस्य पत्राणि लेपयेद्बुधः तेन च
गंधकेनाम्लघृष्टेन तस्य कुर्याच्च गोलकं। ततः पिष्ट्वा [illegible] च मीनाक्षी चांगेरी वा पुनर्नवा। तत्कल्के भुकसूद्रा:=५ चौपत्ती=५
ध्मात्वा तज्ज्ञो लकं क्षि:=८ न बहिर्गोलं लेपयेद्द्व्यंगुलोन्मितं। धृत्वा च गोलकं भांडे सम्यग्वा रोधयेत्। वालुकाभिः प्रपूर्याथ
विभूतिलवणांबुभिः। दत्वा भांडमुखे मुद्रां ततश्चुल्ल्यां विपाचयेत्। क्रमवृद्ध्याग्निना सम्यक् यावद्या
मचतुष्टयं। स्वांगशीतं समुद्धृत्य मर्दयेत्सूरणद्रवैः। दिनैकं गोलकं कुर्यात् तच्छुद्धगंधेन लेपयेत्।
सघृतेन ततो मूषापुटे गजपुटे पचेत्। स्वांगशीतं समुद्धृत्य मृतताम्रं शुभं भवेत्। वांतिभ्रांतिक्ल
मं रेचं न करोति कदाचन। अथ आरमारणं। अर्कक्षीरेण संपिष्टो गंधकस्तेन लेपयेत्। समेनारस्य
पत्राणि शुद्धान्यम्लद्रवैर्मुहुः। ततो मूषापुटे रुध्वा पचेद्गजपुटेन च। एवं पुटद्वयेनैव भस्मारं भव
ति ध्रुवं। आरवत्कांस्यमप्येवं भस्मतां याति निश्चितं। अर्कक्षीरवदाज्ये स्यात् क्षीरं निर्गुंडिकोत रा॰भृ॰
त्था। ताम्रं रीतिं ध्रुवं निर्वर्येत् समगंधकयोगतः। अथ नागमारणं। तांबूलीरससंपिष्टः शिलालेपात्सु ५९
पित्तल कांसी

पिप्पल अंबली

नः पुनः। द्वात्रिंशद्भिः पुटैर्नागो निरुत्थो याति भस्मतां। अन्यच्च। अश्वत्थचिंचात्वक् चूर्णं चतुर्थांशेन निः

क्षिपेत्। मल्लपात्रे विद्रुते नागे लौहदर्व्या च चालयेत्। यामैकेन भवेद्भस्म तत्तुल्यां च मनःशिलां। कां

जिकेन द्वयं पिष्ट्वा पचेद्रूढपुटेन च। स्वांगशीतं पुनः पिष्ट्वा शिलायां कांजिकेन च। पुनः पचेत् एवं वा

रान् एवं षष्टिपुटैर्मृतिः। अथ वंगमारणं। मल्लपात्रे द्राविते वंगे चिंचाश्वत्थत्वचो रजः। दिशांशं दत्वा च तु

नील

र्यांशं मयोदर्व्या प्रचालयेत्। ततो द्विया मात्रेण वंगो भस्म प्रजायते। अथ भस्मसमं तत्तालं हि सा

म्लेन विमर्दयेत्। ततो गजपुटे पक्त्वा पुनरम्लेन मर्दयेत्। तालेन दशमांशेन यामैकं ततः पचेत्। एवं

दशपुटैः पक्वो वंगं च क्रियते ध्रुवं। अथ लोहमारणं। शुद्धलोहभवं चूर्णं पातालगरुडीरसैः। मर्दयित्वा छिलहिंड१

वनतुलसी

त्वा द्विक्रो दद्याद् देवं पुटत्रयं। पुटत्रयं कुमार्य्याश्च कुठारच्छिन्नकारसैः। पुटषट् ततो दद्याद् एवं तीक्ष्ण

मृतं भवेत्। अथ हनुमन्ते लोहमाप्नुहो निरुजाकरं। हंसिपिंडाभि पाटव्यां तस्माच्चतुर्दशं च कारयेत्। मृता

नि लोहानि रसाः भवंति निघ्नंति युक्तानि महामयानि। अभ्यासयोगाद् दृढदेहसिद्धिं कुर्वंत्यरुग्देहज

शिलरस लौह

रा विनाशं। अन्यच्च। क्षिपेद्द्वादशमांशेन दरदं तीक्ष्णचूर्णतः। मर्दयेत् कन्यकाद्रावे यामयुग्मं ततः

वनतुलसी रस

पुटेत्। एवं सप्तपुटैर्मृत्युं लोहचूर्णं भवाद्भु याता। रसैः कुठारच्छिन्नाया पातालगरुडीरसैः। अन्यैश्च छिलहिंड२

अजादुग्धेन नवार्कं दुग्धेन तीक्ष्णं चैवं मृतं भवेत्। अन्यद्पि। सूतकाद्द्विगुणं गंधं दत्वा कुर्य्याच्च कज्जलीं। द्वयोः समं

स्तन्येन छि:२

लोहचूर्णं मर्दयेत्कन्यकाद्रवैः। याम युग्मं ततः पिंडं कृत्वा ताम्रस्य पात्रके। घर्मे धृत्वोरुबूकस्य पत्रैराच्छाद
धा. येद्बुधः। यामार्द्धेनोष्णतां भूत्वा धान्यराशौ न्यसेत्ततः। दत्वोपरि स्तरं वस्तु त्रिदिनांते समुद्धरेत्। पिष्ट्वा चगा
६० लयेद्वस्त्रादेवं वारितरं भवेत्। एवं सर्वाणि लोहानि स्वर्णादीन्यपि मारयेत्। [illegible]शिलागंधार्कदुग्
60 धाक्ताः स्वर्णाद्याः सर्वधातवः। म्रियंते द्वादशपुटैः सत्यं गुरुवचो यथा। अथोपधातुशोधनमारणं।
शिलाजीत
सोनामाखी=५ माक्षिकं तुत्थकं अभ्रं च नीलांजनं शिलालिकाः। रसकश्चेति विज्ञेया एते सप्तोपधातवः। अथ स्वर्ण
माक्षिकशोधनं। माक्षिकस्य त्रयो भागा भागैकः सैंधवस्य च। मातुलिंगद्रवैर्वाथ जंबीरोत्थद्रवैः पचेत्।
चालयेल्लोहजे पात्रे यावत्पात्रं सुलोहितं। भवेत्ततस्तु संशुद्धिं स्वर्णमाक्षिकमृच्छति। अथ तारमा
क्षिकशोधनं। कुलत्थस्य कषायेन घृष्टा तैलेन वा पुटेत्। तक्रेण वाजमूत्रेण म्रियते स्वर्णमाक्षि
तारमाक्षिक
ककोडे=५ कं। कर्कोटीमेषशृंग्युत्थैर्द्रवैर्जंबीरजैर्दिनं। भावयेदातपे तीव्रे विमला शुध्यति ध्रुवं। अथ तुत्थ
ककडासिंगी=५ शोधनं। विष्टया मर्दयेत्तुत्थं मार्जारककपोतयोः। दशांशं टंकणं दत्वा पचेल्लघुपुटे ततः। पुटं दध्ना सुहागा
पुटं क्षौद्रे देयं तुत्थविशुद्धये। अथाभ्रकशोधनं। कृष्णाभ्रकं पचेद्वह्नौ ततः क्षीरे विनिक्षिपेत्। भिन्न धनेद्धिः
चौलाई=२ पत्रं तु तत्कृत्वा तंदुलीयाम्लयोर्द्रवैः। भावयेदष्टयामं तदेवं शुध्यति चाभ्रकं। कृत्वा धान्याभ्रकं त राम:
त्तु शोषयित्वाथ मर्दयेत्। अर्कक्षीरैर्दिनं खल्वे चक्राकारं च कारयेत्। वेष्टयेदर्कपत्रैश्च सम्य ६०

गजपुटे पचेत्। पुनर्मर्द्यं पुनः पाच्यं सप्तवारं प्रयत्नतः। ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयं।
मृयते नात्र संदेहः सर्वरोगेषु योजयेत्। तुल्यघृतं मृतताम्रेण लोहपात्रे विपाचयेत्। घृते जीर्णे
तद्भस्मं तु सर्वकार्येषु योजयेत्। मृतं ताम्रं हरेन्मृत्युं जरापलितनाशनं। अनुपाने अस्य संयुक्तं त
तद्रोगहरं स्मृतं। अथान्यप्रकारः। शुद्धं धान्याभ्रकं मुक्तं शुंठी पञ्चाङ्गयोजितं। मर्दयेत्कांजिके नै
वदिनं चित्रकजैः रसैः। ततो गजपुटं दत्वा तस्मादुद्धृत्य मर्दयेत्। त्रिफलावारिणा तद्वत्पुटं देयं
पुटैस्त्रिभिः। बलागोमूत्रमुशलीतुलसीसूरणद्रवैः। मर्दितं पुटितं वक्त्रौ त्रिस्त्रि वेलं व्रजेन्मृतिं।
अथान्यः प्रकारः। धान्याभ्रकस्य भागैकं द्वौ भागौ टंकणस्य चापि द्वात् तद्रंधमूषायां रुध्वा तीव्रा
ग्निना पचेत्। स्वभाववशीतलं चूर्णं सर्वरोगेषु योजयेत्। अथ नीलांजनशोधनं। नीलांजनं चू
र्णयित्वा जंबीरद्रवभावितं। दिनैकमातपे शुद्धं भवेत्कार्येषु योजयेत्। एवं गैरिककासीसटंकण
निवराटिका। एवं लवंग तोरी च कंकुष्ठं शुद्धिमायाति निश्चितं। अथ मनःशिलाशोधनं। पचेत्त्र्यहम
जामूत्रैर्दोलायंत्रे मनःशिलां। भावयेत्सप्तधा पित्तैरजाया शुद्धिमृच्छति। अथ तालकशुद्धिः॥
तालकं कणशः कृत्वा तच्चूर्णं कांजिके क्षिपेत्। दोलायंत्रेण यामेकं ततः कूष्माण्डजैर्द्रवैः। तिलतै

लोहेकीमेलकी
पापडी=२
कंकोल

शा. ६१ लेपयेद्यामं याम च त्रिफलाजलैः ॥ एवं यंत्रे चतुर्यामं पाच्यं शुध्यति तालकं ॥ अथ रसकशुद्धिः ॥ नरमू
त्रेश्च गोमूत्रैः सप्ताहं रसकं पचेत् ॥ दोलायंत्रेण शुद्धिः स्यात् ततः कार्य्येषु योजयेत् ॥ अथ तालसत्वनि
61 र्गमः ॥ लाक्षा मीनापथ्यः छागी टंकणमगंगशृंग कांपिल्पाकं सर्षपास्सिगुगुंजो ऊर्णा गुडं वेलं वा यव
से तिक्ताघृतं तत्तौ द्वयथा लामं विचूर्णयेत् ॥ एभिर्विमिश्रितास्सर्वे धातवो गाढवह्निना ॥ मूषाध्माताः
प्रजायंते मुक्तसत्वा न संशयः ॥ नरमूत्रेश्च गोमूत्रैः सप्ताहं रसकं क्षिपेत् ॥ दोलायंत्रेण शुद्धिः स्यात्
ततः कार्येषु योजयेत् ॥ अथ रससत्वनिर्गमः ॥ लाक्षा मीनापथ्यः छागीटंकणमगंगशृंग कांपिल्पाकं सर्ष
पाम्लं कोमल्लातकं पथ्यमस्तु याम ॥ भल्लातकेषु संकुट्टकं ड्रिन्या चततः सुधीः ॥ त्रिलान्यत्रपलान्य
त्र वा कुचीच चतुः पलं ॥ मागधीमधुकं मूर्वा मुस्तं मोचरसं मधु ॥ कर्षमात्रान्वि निक्षिप्य सितादेया
समा प्रयतेः ॥ मरिचं कुष्ठं तंदंतीयवानी निंबमेषजं ॥ जीरकं च यवक्षारं के कोलं कमुकं कणा ॥ को
लमात्रान् विनिक्षिप्य मोदकाकारये द्दृढान् ॥ भक्तयेत्प्रातरुत्थाय यहिता श्रीसततेन नरः ॥ अस्यप्र
भावात् कुष्टानि वाधिर्य्यं मरुन्तो रुजः ॥ विलयं यांति तान्यत्र कार्य्यं चेतो विचारिणा ॥ इति श्री
शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने रसकल्पनाध्यायः ॥ अथ रत्नशोधनमु एम: ६१
क्ता श्रीकंदगतं वज्रं त्रिदिनं शुद्धिमृच्छति ॥ तं मंतमंतु वज्रे च खरमूत्रैर्मर्दयेत् ॥ पाकुलस्य ६१

कोद्रवक्काथे दोलायंत्रे विपाचयेत्। पुनः स्त्याप्यं पुनः सेच्यं निम्बुकुर्यात् त्रिसप्तधा। (मवल) मल्कुणैस्ता
लकं पिष्ट्वा यावद्द्रवति गोलकं। घनतर्ज्जोले निहितं वज्रेन तज्जोलं चांघिते धमेत्। सेचयेद्दग्धमूत्रे
ण तज्जोलं च हि पेत्पुनः। रुध्वा ध्मातं पुनः सेच्यमेवं कुर्यात् त्रिसप्तधा। एवं चाम्रियते वज्रं चूर्णं
सर्वत्र योजयेत्। अन्यदपि। हिंगुसैंधवसंयुक्ते क्वाथे कोलत्थजे क्षिपेत्। तप्तं तप्तं पुनर्वज्रं भू
या चूर्णं त्रिसप्तधा। अन्यच्च। मंडूकं कांस्यजे पात्रे निगृह्य स्थापयेत्सुधीः। सभीतो मूत्रयेत्तत्र तन्मूत्रे व
(मल) ज्रमापचेत्। तप्तं तप्तं च वज्रं [illegible] धावज्रस्यैवं मृतिर्भवेत्। अथ वैक्रान्तमारणं। वैक्रान्तं वज्रवत्सोध्यं नीलं
(मेषशृंगी) वा लोहितं तथा। हयमूत्रेण तत्सिंच्यं तप्तं तप्तं त्रिसप्तधा। ततस्तु मेषशृंग्यास्तु पंचांगेन गोलकं क्षिप
त्। पुटेन्मूषापुटे रुध्वा कुर्यादेवं त्रिसप्तधा। वैक्रान्तं भस्मतां याति वज्रस्थाने नियोजयेत्। अथ शे
(गमर-ली) षरत्नशोधनमारणं। स्वेदयेद्दोलिकायंत्रे जयंत्या स्वरसेन च। भ्रमणिमुक्ताप्रवालानि यामैकं शो
धनं भवेत्। कुमार्या तंदुलीयेन स्तन्येन च निषेवणात्। प्रत्येकं सप्तवेलं च तप्तं तप्तानि कृत्स्नशः।
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः। तत्तत्त्रिविधवर्णानि जायन्ते नात्र संशयः। उक्त
माक्षिकवन्मुक्ताः प्रवालानि च मारयेत्। वज्रवत्सर्वरत्नानि शोधयेन्मारयेत्तथा। अथ शिलाजि
तुशोधनं। शिलाजितु समानीय गव्यां मतस्य शिला च्युतं। गोदुग्धैः त्रिफलाक्वाथैः भृंगराजद्रवैश्च मर्द्द

रा०
६२
67

येत्। आतपे दिनमेकैकं तच्चुक्रं शुद्धितां व्रजेत्। अथान्यप्रकारः। मू० षी० शुद्धाः शिलाजितु शिला सूक्ष्मखंडं
प्रकल्पितां। निक्षिप्याऽत्युष्णपानीयेऽथवा मेकस्य क्वाथयेत्सुधीः। मर्दयित्वा ततो नीरं गृह्णीयाद्वस्त्रगालितं। ऊपरसे तलै बैठे फेर जलको होर पात्रमें रखे = २
क्वाथयित्वा च मृत्पात्रे धारयेदातपे बुधः। उपरिस्थं घनं यत्स्यात्तत्क्षिपेदन्यपात्रके। धारयेदातपे
तस्मादुपरिस्थं घनं नयेत्। एवं पुनः पुनर्नीत्वा द्विमासाभ्यां शिलाजितु। भूयात्कार्यक्षमं वन्हौ क्षि
प्तं लिंगोपमं भवेत्। निर्धूमं च ततः शुद्धं सर्वकर्मसु योजयेत्। अधःस्थितं च तच्छेषं तस्मिन्नीरं वि
निक्षिपेत्। विस्तज्य धारयेत् घर्मे सर्वं चैवं तथानयेत्। अथ मंडूरकरणं। अंगारैर्ध्मेत्किट्टं
लोहजं तच्च वा जलैः। सेचयेत्तप्ततप्तं च सप्तवारं पुनः पुनः। पातयित्वा ततः क्वाथैर्द्विगुणैस्त्रिफला
भवैः। आलोड्य भर्जयेद्वन्हौ मंडूरं जायते वरं। अथ क्षारकल्पना। सोमलेच यवक्षारं स्वर्जिकाटंक
णं फटकीं। समं चर्प चलवणं सारवेन वसादरं। काचकूप्यां ततः क्षिप्त्वा वारुणीयन्त्रमुद्धरेत्। यामा
द्वे द्रवते तेन पारस्य शुक्तिवराटिका। क्षारद्वयस्य कोष्णं निम्बुकान्यग्नौ प्रदापयेत्। नीत्वा त
त्कलमन्यपात्रे क्षिप्त्वा नीरे चतुर्गुणे। विमर्घ धारयेद्रात्रौ प्रातरस्थजलं नयेत्। तत्क्षारं क्वाथ
येद्वन्हौ यावत्सर्वं विशुष्यति। ततः पात्रात्समुद्धृत्य क्षाराग्राह्यः सितप्रभः। चूर्णीभः सौति सार्यः
स्यात्पेयः स्यात्क्वाथवान्स्थितः। इति क्षारद्वयं धीमान्प्रयुक्तं कार्यं प्रयोजयेत्॥ इति श्रीदामोदर

पला प्राप्य त्याग मागी तिलो लाकय वीयजाः सर्जिका टंकणं ६ द्रव्य

गुत्स्याधिः = १ ततक्षीरंधिः = ३
मातरं धिः ३
रा०मु०
६२

सूनुना शार्ङ्गधरेण विरचितायां चिकित्सास्थाने धातुशोधनमारणकल्पनाध्यायः ॥ ॥ पार
दः सर्वरोगाणां जेता पुष्टिकरः स्मृतः । सुदिनैः साधितः कुर्यात् तत्संसिद्धं देहलोहयोः । रसेंद्रः पारदः
सूतो हरजः सूतको रसः । मुकुंदश्चेति नामानि ज्ञेयानि रसकर्मसु । ताम्रनागरनागाभ्यां हेमवंर
पितल=४ गोचतीक्ष्णकं । कांस्यकं तुल्लोहं च धुत्तु नवो नवमे स्मृतः । सूर्यादीनां ग्रहाणां ते कथिता नामतः
क्रमात् । अथ पारदशोधनं । राजीरसोन मूषायां रसं क्षिप्त्वा विबंधयेत् । वस्त्रेण दोलिकायंत्रे स्वेद
येत्कांजिके त्र्यहं । दिनैकं मर्दयेत्सूतं कुमारीसंभवैर्द्रवैः । तथा चित्रकजैः क्वाथैर्मर्दयेदेकवास
सार्द्धि=६ रं । कौकमाचीरसे स्तद्वद्दिनमेकं च मर्दयेत् । त्रिफलायास्ततः क्वाथे रसो मर्द्यः प्रयत्नतः । तत
स्तेभ्यः पृथक्कुर्यात्सूतं प्रक्षाल्य कांजिके । ततः चिच्चारसं खल्वे रसादर्द्धं च सैंधवं । मर्दयेन्नि
बुकरसैर्दिनमेकमनारतं । ततो राजीरसोन प्रक्षेप्य नवसादरः । एतैः रसैः समैः स्तद्वत्सू
जमोंकीकांजीका जल=३ तो मर्द्यस्तुषांबुना । ततः संशोध्य चक्राभं कृत्वा लिप्त्वा च हिंगुना । द्विस्थालीसंपुटे धृत्वा लापयेद्भल हांडीद्वयेन ३
वलेन च । अधःस्थालीं ततो मुद्रां दद्यादृढतरां बुधैः । विशोष्याग्निं निधायाधो निषिंचेद्वुनो
परि । ततस्तु कुर्यात्तीक्ष्णाग्निं तदधः प्रहरत्रयं । एवं निपत्य सा सूर्ध्वं रसो दोषविवर्जितः । अथो

मेडाश्रृंगी=२

शा. ६२ द्वीवरीमध्ये लग्नो ग्राह्यो रसोत्तमः। अथ गंधकशोधनं। लोहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत्।
तप्ते घृते तत्समानं निक्षिपेद्गंधकं रजः। विद्रुतं गंधकं शीघ्रं दुग्धमध्ये विनिक्षिपेत्। एवं गंधकशु
द्धिः स्यात्सर्वकार्येषु योजयेत्। अथ पारदशोधनं। मेषीक्षीरेण दरदमम्लवर्गैश्च भावितं। सप्तवा
63 रं प्रयत्नेन शुद्धिमायाति निश्चितं। अथ दरदाद्रसाकृष्टिः। निंबूरसैर्निंबपत्ररसैर्वा याममात्रकं।
पिष्ट्वा दरदमूर्ध्वं च पातयेत्सूतयुक्तिवत्। ततः शुद्धरसं तस्मान्नीत्वा कार्येषु योजयेत्। अथ रसस्य
मुखकरणम्। कालकूटो वत्सनाभः शृंगकश्च प्रदीपनः। हालाहलो ब्रह्मपुत्रो हारिद्रः सक्तुक
स्तथा। सौराष्ट्रिक इति प्रोक्ता विषभेदा अमी नव। अर्कसेहुंडधत्तूरलांगलीकरवीरकाः। गुंजा
अफीम=५ हिफेनमित्येताः सप्तोपविषजातयः। एतैर्विमर्दितः सूतः छिन्नपक्षः प्रजायते। मुखं च जायते तेन
स्य धातून् ग्रसते रसः। अन्यदपि। अथवा कटुकक्षारैः राजीलवणपंचकैः। रसोनो नवसारश्च
शिग्रुश्चैकत्र चूर्णितैः। समांशैः पारदाद्दत्तैर्जंबीरेण द्रवेण च। निंबूतोयैः कांजिकैर्वा सोष्णं खल्वे वि
मर्दयेत्। लवणाम्लैर्मुखं तस्य जायते त्रिदिवासरैः। अहोरात्रत्रयेणास्य ध्रुवं धातुचतुर्मुखं। अन्य र.म: ६२
च्च। अथवा पिंडलीकीटैः रसो मर्द्यस्त्रिवासरं। लवणाम्लैर्मुखं तस्य जायते धातुघस्मरं। अथ गंध

वीरवऊटीया=१

कज्जारणं। अथ कच्छपयंत्रेण गंधजारणमुच्यते। मृत्कुंडे निक्षिपेन्नीरं तन्मध्ये च सरावकं। महत्त्
कुंडपिधानाभं मध्ये मेखलया युतं। लिप्ता च मेखलामध्ये चूर्णेनात्र रसं क्षिपेत्। रसस्योपरि
गन्धस्य रजो दद्यात्समांशकं। दत्वोपरि सरावं तु भस्ममुद्रां प्रदापयेत्। तस्योपरि पुटं दद्याच्चतु वज्र
सिंगरफ काघाराः र्भिर्गोमयोपलैः। एवं पुनः पुनर्गंधं षड्गुणं जारयेद्बुधः। गंधे जीर्णे भवेत्सूतः तीक्ष्णाग्निः सर्वकर्मकृत्।
धूमसारं रसं तो अथ ष्टरसमारणं। धूर्त्तूरसपिरसं तोरिंगंधकं नवसादरं। यामैकं मर्दयेदम्ले भाण्डं कृत्वा समं समं। काचकूप्यां विनि
= रीष्ठिः ५ क्षिप्य तां च मृद्वस्त्रमुद्रया। विलिप्य परितो वक्त्रे मुद्रां दत्वाऽवशोषयेत्। अधः सच्छिद्रपिठरीमध्ये कूपीं निवे पिठरी
लोहे की मैल की पा शयेत्। पिठरीं वालुकाक्षारैः संपूर्य्य तां कूपिं प्रगालवत्। निवेश्य चुल्ल्यां तदधः कुर्याद्वह्निं शनैः शनैः। तस्मादप्य
टि कंडी पा= धिकं किंचित्तावकं ज्वालयेत्क्रमात्। एवं द्वादशभिर्यामैर्म्रियते सूतकोत्तमः। स्फोटयेत्स्वांगशीतं तु तन्मूर्द्ध्
सूखी वाकू पिकान ले। गंधकं त्यजेत्। अधस्थं मृतसूतं तु सर्वकर्मसु योजयेत्। सयष्या। अपामार्गस्य बीजानां मूषा युग्मं प्रकल्पये
त्। तत्संपुटे न्यसेत्सूतं मलयूहुग्धमिश्रितं। द्रोणपुष्पी प्रसूनानि विडंगमरिमेदकः। तच्चूर्णम- बोर्द्धं च
दत्वा मुद्रां प्रदापयेत्। तं गोलं तु नयेत्सम्यक् मन्मूषासंपुटे सुधीः। मुद्रां दत्वा शोषयित्वा ततो गजपुटं पचे
त्। एवमेकपुटेनैव जायते भस्मसूतकं। अन्यदपि। काकोदुंबरिकादुग्धैः रसं किंचिद्विमर्दयेत्। तदुग्ध घ

रा. ६४
64

ष्ट्वा हिंगोष्ठमूषायुग्मं प्रकल्पयेत्। हिंगुलात्तत्संपुटे सूतं तत्र मुद्रां प्रदापयेत्। ध्मात्वा तं गोलकं शास्त्रोक्त्या मूषासंपु-
टे धिके। पचेन्मृदुपुटे नैव सूतको याति भस्मतां। अन्यच्च। नागवल्लीरसैर्घृष्टः कर्कोटीकंदगर्भितः। मृन्मूषा-
संपुटे पक्वो सूतो यात्येव भस्मतां। अथ ज्वरांकुशो रसः। अयं ज्वरांकुशो नाम रसः सर्वज्वरापहः। खंडितं हा-
रितालं श्रृंगं ज्वालामुखीरसैः समं। रुध्वा भांडे पचेच्चुल्ल्यां याममेकं ततो नयेत्। अष्टांशं त्रिकटुं दद्यान्निष्क-
मात्रं च भक्षयेत्। नागवल्लीरसैः सार्द्धं वातपित्तज्वरापहं। शुद्धं सूतं विषं गंधं प्रत्येकं शाणसंमितं। धत्तूरबी-
जं त्रिशाणं सर्वेभ्यो द्विगुणं भवेत्। हेमाह्वाकारयेद्भागान् सूक्ष्मं चूर्णं प्रयत्नतः। देयं जंबीरमज्जाभिः चूर्णं
गुंजाद्वयोन्मितं। आर्द्रकस्य रसेनापि ज्वरे देयं त्रिदोषजे। अथ ज्वरारिरसः। पारदं रसकं तालं तुत्थं टंक- पारदरसग
णं गंधकौ। सर्वमेतत्समं शुद्धं कारवेल्ल्या रसैर्दिनं। मर्दयेल्लेपयेत्तेन ताम्रपात्रोदरं भिषक्। अंगुल्य- रीरहरतालउ
र्द्धप्रमाणेन ततो रुंध्याच्च तन्मुखं। पचेत्तं वालुकायंत्रे क्षिप्त्वा धान्यानि तन्मुखं। यदा स्फुटंति धान्यानि नीलाथोथा
तदा सिद्धिं विनिर्दिशेत्। ततो नयेत्स्वांगशीतं ताम्रपात्रोदराद्भिषक्। रसं ज्वरारिनामानं विचूर्ण्य मरिचैः समं। गुडगगंधक
माषैकं पर्णखंडेन भक्षयेन्नाशयेज्ज्वरं। त्रिदिनैर्विषमं तीव्रं एकाहिकं द्वित्रिचातुर्थिकं। अथ शीतज्वरारिरसः। शं- राम: ६४
भोः कंठनिवासिनं च मरिचं दैत्येंद्ररक्तो रविः पक्षौ सागरलोचनं शशिकलाभागैस्तु संख्यान्वितैः। खल्वा
गंधक

नेरवल्लुमर्दितं रविजल्लेर्गुंजैकमात्रं ददेत् सिद्धोयं ज्वरदंतिदर्पदलनः ख्यातोपंचाननः ॥ तालकं तु
स्यकं ताम्ररसं गंधं मनःशिला ॥ कर्षकर्षं प्रयोक्तव्यं मर्दयेत्रिफलांबुभिः ॥ गोलं न्यसेत् संपुटके पुटं दद्या
त्प्रयत्नतः ॥ ततो नीत्वार्कदुग्धेन वज्रीक्षीरेण सप्तधा ॥ क्वाथेन दंत्याः श्यामायाः भावयेत् सप्तधा पु एपामनिसोन
नः ॥ माषमात्रं रसं देयं पंचाननमरिचैर्युतं ॥ गुडं गद्यानकं चैव तुलसीदलयुग्मकं ॥ भक्षयेत्रिदिनं
भक्त्या शीतारि दुर्लभं परं ॥ पथ्यं दुग्धोदनं देयं विषमं शीतपूर्वकं ॥ दारुर्व्वं हरत्याशु तत् तृतीयकं च
तुर्थकं ॥ व्याहिकं सततं चैव वृंदं वेलंपं च नियच्छति ॥ अथ ज्वरघ्निवटिका ॥ भागैकं स्याद्रसात् शुद्धाद्दि
अकरकरा
ऐलुवा लियः पिप्पली शिवा ॥ आकारकरभो गंधः कटुतैलेन शोधितः ॥ फलानि चेंद्रवारुण्या अनुमी
गैर्मिता अमी ॥ एकत्र मर्दयेच्चूर्णमिंद्रवारुणिकारसैः ॥ माषोन्मितां वटीं कुर्याद्दद्यात् सद्यो ज्वरे
गिलोई बुधः ॥ छिन्नारसानुपानेन ज्वरघ्नी वटिका मता ॥ अथ लोकनाथरसः ॥ शुद्धो बुभुक्षितः सूतो भाग
द्वयमितो भवेत् ॥ तथा गंधस्य भागौ द्वौ कुर्यात् कज्जलिकां तयोः ॥ सूतात् चतुर्गुणेष्वेव कपर्दकेषु विनिः कौडिका
क्षिपेत् ॥ भागैकं टंकणं दत्वा गोक्षीरेण विमर्दयेत् ॥ तथा शंखस्य खंडानां भागान्नष्टौ च कल्पयेत् ॥
मर्दयेत्तेन कल्केन वराटानां मुखानि च ॥

क्षिपेत्सर्वं पुटस्यांतः चूर्णलिप्तसरावयोः॥ ततो हस्तोन्मिते धृत्वा पुटेन जपुटेन च। स्वांगशीतं समुद्धृत्य वि-
रस. ६५ चूर्णितं सर्वमेकतः। गुंजासंमितं चूर्णमेकोनत्रिंशदूषणैः। घृतेन वातजे दद्यान्नवनीतेन पित्तजे। द्रोणद्रुण
श्लेष्मजे दद्यादतीसारे तथा क्षये। अरुचौ ग्रहणीरोगे कार्श्ये मंदानले तथा। कासश्वासेषु गुल्मेषु लो-
65 कनाथरसो हितः॥ तस्योपरि घृतान्नं च भुंजीत कवलत्रयं। मंचे शयनके ऽप्युत्तानः शयीतानुपधान-
के। अन्नमल्पं सघृतं भुंजीत मधुरं दधि। प्रायेण जांगलं मांसं प्रदेयं घृतपाचितं। सदुग्धभक्तं
दद्याच्च जाते ऽग्नौ साध्यभोजनं। सघृतान्मुद्गवटकान् व्यंजने समभिधारयेत्। तिलामलककल्केन
स्नापयेत्सर्पिषा तनुः। अभ्यंजयेत्सर्पिषा च स्नानं कोष्णजलेन च। क्वचित्तैलं न गृह्णीयात् न बिल्वं कार-
बेंगन अमली वेल्लकं। वार्त्ताकं सफरीं चिंचां त्यजेद्व्यायाममैथुने। मद्यं संधानकं हिंगु शुंठीमाषान्मसूरकान्। कू-
ष्मांडं राजिकां कोलं कांजिकं चैव वर्जयेत्। त्यजेदत्युष्णनिद्रां च कांस्यपात्रे च भोजनं। ककारादियुतं
सर्वं त्यजेच्छाकफलादिकं। नाश्नीयात्कदलीकंदं कांजिकं करमर्दकं। करवीरं कारवेल्लं षट्कको- रसः
रालिं वर्जयेत्। ग्राह्योयं लोकनाथस्तु शुभनक्षत्रवासरे। पूर्णतिथौ शुक्लपक्षे जाते चंद्रबले तथा॥ ६५
पूजयित्वा लोकनाथं कुमारीं भोजयेत्ततः। दानं दत्वा द्विघटिकामध्ये ग्राह्यो रसोत्तमः। रसाच्चेज्जायते

तापस्तदा शर्करयायुतं। सत्वं गुडूच्या गलकीयादं दाहे चनयायुतं। सर्वेत्यजे च्छाकफलं दिवानिद्रां च मैथुनं। खर्जूरं दाडिमं द्राक्षा मिश्रुखंडानि भक्षयेत्। अरुचौ निस्तुषं धान्यं घृतभृष्टं सशर्करं। दद्याज्ज्वरे तथा धान्यं गुडूची क्वाथमाहरेत्। उशीरवासकक्वाथं दद्यात्समधु शर्करं। रक्तपित्ते तथा श्वासे कासे च स्वरसंक्षये। अग्नि भक्षजयी चूर्णं मधुना निशि दीयते। निद्रानाशे ऽतिसारे च ग्रहण्यां मंदपावके। सौवर्चलाभया कृष्णा चूर्णमुष्णजलैः पिबेत्। शूले ऽजीर्णे तथा कृष्णा मधुयुक्ता ज्वरे हिता। प्लीहोदरे वातरक्ते च दद्यात्चैव गुडांकुरे। नासिकाक्षतरक्ते च रसं दाडिमपुष्पजं। दूर्वायाः स्वरसं नस्ये प्रदद्यात् च्छर्करायुतं। कोलमज्जा कणा वर्हिपक्षभस्म सशर्करं। मधुना लेहये च्छर्दिहिक्काकोपस्य शांतये। विधिरेष प्रयोज्यस्तु सर्वे मृगांकपोटलीरसे। मृगांके हेमगर्भे च मौक्तिकाख्ये ऽपरेषु च। इत्ययं लोकनाथाख्यो रसः सर्वरुजो जयेत्। अथ मृगांकपोटलीरसः। भूर्ज्ज वृत्तनु पत्राणि हेम्नः सूक्ष्माणि कारयेत्। तुल्यानि तानि सूतेन खल्वे क्षिप्त्वा विमर्दयेत्। कांचनारीरसेनैव ज्वालामुख्या रसेन च। लांगल्या वा रसैस्तावद्यावद्भवति पिष्टिका। ततो हेम्नश्चतुर्थांशं टंकणं तत्र निक्षिपेत्। पिष्टं मौक्तिकचूर्णं च हेम्नो द्विगुणमावपेत्॥

रलवणाभूरिते भांडे धारयेत्तं च संपुटे। मुद्रां दत्वा शोषयित्वा वह्निर्गोमयैः पचेत्। ततः शीतं समाकृष्य गंधं सूतसमं क्षिपेत्॥१

धारयेत्२ मर्दयेत्

तेषु सर्वसमं गंधं क्षिप्त्वा चैकत्र कारयेत्। तेषां कृत्वा ततो गोलं वासोभिः परिवेष्टयेत्॥ पश्चान्मृदा वेष्टयित्वा दहेर२

श्री॰ शोषयित्वा च पाचयेत्। सराव संपुटस्थं तत्तत्र मुद्रां प्रदापयेत्। घृष्ट्वा च सर्वं वस्त्र वल्वे पुटे गजपुटेन च। स्वांग

६६ शीतं ततो नीत्वा गुंजायुग्मं प्रयोजयेत्। अष्टभिर्मरिचैर्युक्तं कृष्णात्रययुतां पवा। विलोक्य देयादोषादीनेके

60 कारसरक्तिका। सर्पिषा मधुना वापि दद्याद्दोषाद्यपेक्षया। लोकनाथसमं पथ्यं कुर्यात्स्वस्थमनाः शुचिः।

श्लेष्माणं ग्रहणीं कासं श्वासं सत्तपमरोचकं। अग्निं च कुरुते दीप्तिं कफवातौ नियच्छति। मृगांकोयं रसो

हन्यात्कृशत्वं वलहानितां। अथ हेमगर्भपोटलीरसः। सूतात्पादप्रमाणेन हेम्नः पिष्टिं प्रकल्पयेत्। तयोः

स्याद् द्विगुणो गंधो मर्दयेत्कांचनारिणा। कृत्वा गोलं क्षिपेन्मूषां संपुटे मुद्रयेत्ततः। पचेद्भूधरयंत्रे च वासर

बुधः त्रितयं भुवः। ततउद्धृत्य तत्सर्वं दद्यादंधं च तत्समं। मर्दयेदाईकरसे चित्रकस्य रसेन च। स्थूलपीतवराटी वटीयां पी

श्च धारयेत्तेन युक्तितः। एतस्माद्दोषधात्कुर्यादष्टमांशेन टंकणं। टंकणार्द्धं विषं दत्वा विष्टासे ऊंडे दुग्धकैः। लिपाकोडी यां

मुद्रयेत्तेन कल्केन वराटीनां मुखानि च। भांडे चूर्णं प्रलिप्याथ धृत्वा मुद्रां प्रलेपयेत्। गर्त्ते हस्तोन्मिते धृत्वा

पुटेद्गजपुटेन च। स्वांगशीतं रसं नीत्वा प्रदद्याल्लोकनाथवत्। पथ्यं मृगांकवज्ज्ञेयं त्रिदिनं लवणं त्यजेत्। यः रामः

दाघार्द्दिर्भवेत्तस्य दद्याच्छिन्नासत्तं तदा। मधुयुक्तं तथा श्लेष्मकोपे दद्यादुडाईकं। विरेके भर्जितां भंगां प्र ६६

प्रदापयेत्२

देया दधिसंयुता। हयेल्कासंदत्तयंश्वासेग्रहणीमरुचिंतथा। अग्निंचकुरुतेदीप्तं कफंवातंनियच्छति। हेमग(र्भ)

भपरोक्तेयोरसःपोटलिकाभिधः। अथद्वितीयहेमपोटलीरसः॥ रसस्यभागाश्चत्वारस्तावंतःकनकस्यच। त(तो) सोनार

योऽस्यपिष्टिकांकृत्वागंधोद्वादशभागिकः। कुर्यात्कज्जलिकांतेषांमुक्ताभागाश्चषोडश। चतुर्विंशतिशंखस्य

निंबूकजेःद्रि: भागैकंटंकणस्यचा। एकत्रमर्दयेत्सर्वंपक्कनिंबूकजेरसैः। कृत्वातेषांततोगोलंमूषासंपुटकेन्यसेत्। मुद्रां

दत्वाततोहस्तमात्रेगर्त्तेचगोमयैः। पुटेद्गजपुटेनैवस्वांगशीतंसमुद्धरेत्। पिष्ट्वागुंजाचतुर्मानंदद्याद्व्याज्य

संयुतं। एकोनत्रिंशन्मानेनमरिचैःसहदीयते। राजतेमृण्मयेपात्रेकांचनेकाथलोहजे। लोकनाथसमंपथ्यं

कुर्यात्त्रयतमानसः। कासेश्वासेक्षयेवातेकफेचग्रहणीगदे। अतिसारेप्रयोक्तव्यापोटलीहेमगर्भिका॥ अ(थ)

थमहाज्वरांकुशोरसः। शुद्धसूतोविषंगंधःप्रत्येकंशाणसम्मितं। धूर्त्तबीजंत्रिशाणंस्यात्सर्वेभ्योद्विगुणाभवे

बोकस्याभेः नैःव्योषलि लितं। त्। हेमाक्काकारयेदेषांचूर्णंसूक्ष्मंप्रयत्नतः। दद्याज्जंबीरमज्जाभिःचूर्णंगुंजाद्वयोन्मितं। आर्द्रकस्यरसेवा

पिज्वरंहंतित्रिदोषजं। एकाहिकंद्व्याहिकंचत्र्याहिकंचचतुर्थकं। विषमंचज्वरंहन्यात्ख्यातोयंज्वरांकुशः॥

॥अथअतीसारेआनंदभैरवरसः। दरदंवत्सनाभंचमरिचंटंकणंकणाः। चूर्णयेत्समभागानिरसोह्यानंदभै

रवः। गुंजेकंवाद्विगुंजंवाबलंज्ञात्वाप्रयोजयेत्। मधुनालेहयेच्चानुकुटजस्यफलत्वचं। चूर्णितंकर्षमात्रं(तु)

जंबीरिकारसोपेतंमर्दयेद्यामतुर्यकं। २

चत्रिदोषोत्थान्निसारजित्॥ दध्यन्नं दापयेत्पथ्यं गवाजं तक्रमेव वा॥ दिनाखायां जले शीतं विजयां विहितां निर्
रा. ल्लां॥ अथ लघुसूचिकाभरणरसः॥ विषं पलमितं सूतं शाणिकं चूर्णयेद्द्वयं॥ तच्चूर्णं संपुटे क्षिप्त्वा काचलिप्तस
६७ रावयोः॥ मुद्रां दत्वा च संशोष्य ततस्तं चुल्ल्यां निवेशयेत्॥ वह्निं शनैः शनैः कुर्यात्प्रहरद्वयसंख्यया॥ तत उद्धृत्य त
६७ न्मुद्रामुपरिस्थसरावकात्॥ संलग्नो यो भवेत्सूतस्तं गृह्णीयाच्छनैः शनैः॥ वायुस्पर्शो यथा न स्यात् ततः कुप्यां नि
वेशयेत्॥ यावत्सूच्यामुखे लग्नं कूप्यां निर्याति भेषजं॥ तावन्मात्रे रसो देयं मूर्छिते सन्निपातिनि॥ क्षुरेण म
स्तके मूर्छित तत्रांगुल्या प्रकर्षयेत्॥ रक्तभेषजसंपर्कान्मूर्छितोपि हि जीवति॥ तथैव सर्पदष्टस्तु मृतवत्स्थो
पि जीवति॥ यदा तापो भवेत्तस्य मधुरं तत्र दीयते॥ अथ जलचूडारसः॥ भस्मसूतसमं गंधं गंधात्पादं मनः
सोनमखी शिलां॥ माक्षिकं पिप्पली व्योषं प्रत्येकं शिलया समं॥ चूर्णयेद्भावयेत्सिक्तैर्मत्स्यमाहररसैं भवैः॥ सप्तधा भाव
मूसली येच्छुष्कं देयं गुंजाद्वयं हितं॥ तालमूलीरसं चानु पंचकोलसृतोपि वा॥ जलचूडारसो नाम सन्निपातं नियु
च्छति॥ जलयोगेन कर्त्तव्यं तेन वीर्यं भवेद्रसे॥ अथ पंचवक्त्रो रसः॥ शुद्धं सूतं विषं गंधं मरिचं टंकणं कणां॥ रामः ६७
मर्दयेद्धूर्त्तजैर्द्रावैर्दिनमेकं च शोधयेत्॥ पंचवक्त्रो रसो नाम द्विगुंजः सन्निपातजित्॥ अर्कमूलकषायं

तुसञ्चोषमनुपाययेत्॥ भोज्यं दध्योदनं पथ्यं जलयोगं च कारयेत्॥ रसेनानेन शाम्यंति सद्योद्रेण।
जलोदरं कफोदयं॥ मध्वार्द्रकरसं चानुपिबेदग्निविवृद्धये॥ यथेष्टं घृतमांसानि शक्तो भवति पावकः॥ अथ
उन्मत्तरसः॥ रसं गंधकं तुल्यांशं धत्तूरफलजैः रसैः॥ मर्दयेद्दिनमेकं तु तत्तुल्यं त्रिकटुं क्षिपेत्॥ उन्म
जमा तुणेय
त्ताख्यो रसो नाम्ना नस्ये स्यात्सन्निपातजित्॥ निस्तुषं कुजे पालवीजं च दशनिष्कं प्रचूर्णयेत्॥ मरिचं ७मासे ४
माशे
पिप्पलीमूलं प्रतिनिष्कं विमिश्रयेत्॥ भाव्यो जंवीरजैर्द्रावैः सप्ताहं तन्नयेत्ततः॥ रसोयमंजनेद
तः सन्निपातं विनाशयेत्॥ अथ पुनर्नवरसः॥ सूतं टंकणकं तुल्यं मरिचं सूततुल्यकं॥ गंधकं पिप्पली शुंठी
द्वौ द्वौ भागौ विचूर्णयेत्॥ सर्वतुल्यं क्षिपेद्दंतीवीजं निस्तुषितं भिषक्॥ द्विगुंजं रेचनं सिद्धं नाराचोयं महारसः
॥ आध्मानं मलविष्टंभं मुद्रावर्त्तं च नाशयेत्॥ अथ इच्छाभेदीरसः॥ दरदं टंकणं शुंठी पिप्पली चैव कार्षिका।
हेमाह्वा पलमात्रा स्यात् दंतीवीजं च तत्समं॥ विचूर्ण्यैकत्र सर्वाणि गोदुग्धेनैव साधयेत्॥ त्रिगुंजं रेचनं।
दद्यादिच्छाभाध्मानरोगिषु॥ अथ राजमृगांको रसः॥ भस्म सूतं त्रयो भागा भागैकं हेमभस्मकं॥ मृतताम्र
स्य भागैकं शिलागंधकतालकं॥ प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत्॥ वराटीः पूरयेत्तेन छागीक्षीरेण
टंकणं॥ पिष्ट्वा तेन मुखं रुध्वा मृद्भांडे तं निरोधयेत्॥ शुष्कं गजपुटे पक्त्वा चूर्णयेत्स्वांगशीतलं॥ रसो राजमृ

तप॰ तदा दवेत्पथ्यं स्त्रीकोपाग्नीश्रमं त्यजेत्। पथ्यं च ज्वरघ्नं सानि राजरोगप्रशांतये॥

शांकोयं चतुर्गुंजः स्यात् पटहः। दत्तपिप्पलिकाक्षौद्रैरेको नत्रिंशद् दूषणैः॥ अथ अग्निरसः। शुद्धं सूतं द्वि

शा॰ धा गंधं कुर्यात् खल्वे न कज्जलीं। तयोः समं तीक्ष्णचूर्णं मर्दयेत् कन्यकाद्रवैः। द्विजामातेकृतं गोलं ताम्रपा

६ त्रे विनिक्षिपेत्। आच्छाद्य एरंडकैः पत्रेण यामार्द्धेन उष्णता भवेत्। धान्यराशौ न्यसेत् पश्चात् दहोरात्रात् समुद्धरेत्।

68 संपीड्य गालयेत् वस्त्रे सत्यं वारितरं भवेत्। त्रिकटु त्रिफलैलाभिर्जातीफललवंगकैः। नवभागोन्मितैरेतैः

समः पूर्वरसो भवेत्। संचूर्ण्य लेहयेत् क्षौद्रैर्भक्ष्यं निष्कद्वयं द्वयं। सोयमग्निरसो नाम्ना क्षयकासनिकृंत

नः॥ अथ सूर्यावर्त्तो रसः॥ सूतार्द्धं गंधकं मर्द्यं यामैकं कन्यकाद्रवैः। द्वयोस्तुल्यं ताम्रपात्रं पूर्वकल्के

न लेपयेत्। दिनैकं स्थालिकायंत्रे पक्त्वामादाय चूर्णयेत्। सूर्यावर्त्तो रसो ह्येष द्विगुंजः श्वासजिद्भवेत्। अ

स्वनमती थ स्वच्छंदभैरवो रसः। शुद्धसूतं मृतं लोहं ताप्यं गंधकतालकं। पथ्याग्निमंथनिर्गुंडी त्र्यूषणं टंकणं विषं

। तुल्यांशं मर्दयेत् खल्वे दिनं निर्गुंडिकाद्रवैः। मुंडीद्रवैर्दिनैकं तु द्विगुंजं वटिकीकृतं। भक्षयेद्वातरोगार्त्तो ना

म्ना स्वच्छंदभैरवं। रास्नामृतादेवदारु शुंठीवातारिजं शृतं। सगुग्गुलुं पिबेत् क्वाथमनुपानं सुखावहं। अ रामः

थ हंसपोटलीरसः। दग्धान् कपर्दकान् पिष्ट्वा त्र्यूषणं टंकणं विषं। गंधकं शुद्धसूतं च तुल्यं जंबीरजद्रवैः ६

। मर्दयेद्भक्षयेन्माषं मरिचाज्यं लिहेदनु। निहंति ग्रहणीरोगं पथ्यं तक्रोदनं हितं। अथ त्रिविक्रमो रसः।

मृतं ताम्रं मजाक्षीरैः पाच्यं तुल्यैर्गते द्रवे॥ तत्ताम्रं शुद्धसूतं च गंधकं च समं समं॥ निर्गुंडीस्वरसैर्मर्द्यं दिनं
तद्गोलकं भवेत्॥ यामैकं वालुकायंत्रे पाच्यं योज्यं द्विगुंजकं॥ बीजपूरकमूलेन सजलेनानुपाययेत्॥ रस
स्त्रिविक्रमो नाम्ना मासैकेनाश्मरीं जयेत्॥ अथ महातालेश्वरो रसः॥ तालं ताप्यं शिलां सूतं शुद्धं सैंधव — सोनमाषी
टंकणं॥ समांशं चूर्णयेत्खल्वे सूताद्द्विगुणगंधकं॥ गंधतुल्यं मृतं ताम्रं जंबीरैर्दिनपंचकं॥ मर्द्यं षड्भिः
पुटैः पाच्यं भूधरे संपुटोदरे॥ पुटे पुटे द्रवैर्मर्द्यं सर्वमेतत्तु षट्पलं॥ द्विपलं मारितं ताम्रं लोहभस्म चतुः
पलं॥ जंबीराम्लेन तत्सर्वं दिनं मर्द्यं पुटेल्लघु॥ त्रिंशदंशं विषं चास्य दत्त्वा सर्वं विचूर्णयेत्॥ माषैकं आज्ये
न संमिश्रं निष्कार्द्धं भक्षयेत्सदा॥ मध्वाज्यैर्वाकुचीचूर्णं कर्षमात्रं लिहेदनु॥ सर्वकुष्ठानि हंत्याशु महा
तालेश्वरो रसः॥ अथ कुष्ठकुठारो रसः॥ भस्मसूतसमो गंधो मृतायस्ताम्रगुग्गुलुः॥ त्रिफला च महानिं — मृतताम्र
बश्चित्रकश्च शिलाजितुः॥ ह्येतच्चूर्णितं कुर्यात्प्रत्येकं शाणषोडश॥ चतुःषष्टिं करंजस्य बीजचूर्णं प्र
ताम्रं द्वि॰ — कल्पयेत्॥ चतुःषष्टिमृतं ताम्रं मध्वाज्याभ्यां विलोडयेत्॥ स्निग्धभांडे धृतं खादेद्द्विनिष्कं सर्वकुष्ठनु
त्॥ रसः कुष्ठकुठारोयं गलत्कुष्ठनिवारणः॥ पथ्यं कार्यं तु मधुरैस्तदभावे जलोदनः॥ पातालगरुडी — छिलगर
मूलं मधुपुष्पसधान्यकं॥ सितया भक्षयेत्कर्षमतितापापनुत्तये॥ श्वेतकुष्ठं निहंत्याशु साध्यासाध्यं न संशः — जीर

शा. ६९ शयः ॥ अथ उदयादित्यरसः ॥ शुद्धं सूतं द्विधा गंधं मर्द्यं कन्याद्रवैर्दिनं । तद्गोलं विकुरीमध्ये ताम्रपात्रे निरोध
येत् ॥ सूतकान्त्रिगुणेनैव शुद्धेनाधोमुखेन च । पार्श्वे भस्म निधायाथ पात्रोर्द्ध्वे गोमयं जलं । किंचित्किंचित्प्रदात
व्यं चुल्ल्यां यामद्वयं पचेत् । वंशाग्निना समुद्धृत्य स्वांगशीतं विचूर्णयेत् । काष्ठोदुंबरका वह्निं त्रिफला राजवृ
69 क्षकं । विडंगं बाकुचीबीजेकां प्ययेत्तेन भावयेत् । दिनैकं मुद्रयादिस्मो रसो देयो हिंगुजकैः । द्विचद्विकं दद्रुकु
ष्ठं श्वेतकुष्ठं च नाशयेत् । अनुपानं च कर्तव्यं बाकुचीफलचूर्णकं । खदिरस्य कषायेण समेन परिकल्पितं ।
त्रिशाणं तज्जलं वा क्षीरैः काथै वा त्रिफलैः पिबेत् । त्रिदिनांते भवेत्स्फोटः सप्ताहाद्वा किलासकं । नीलांगुंजा
चक्रांसी सैंधवचूर्णं हंसपादिकं । सूर्यभक्तो चचांगेरी पिष्टं तुल्यानि लेपयेत् । स्फोटस्थानं प्रशांतं स्यात्सर्वलेपत्र
रात्रे पुनः पुनः । श्वेतकुष्ठं निहंत्याशु साध्यासाध्यं न संशयः ॥ अथ चित्रलेपः ॥ गुंजाफलाग्निचूर्णं च ले
पितं श्वेतकुष्ठनुत् । शिलापामार्गभस्मापि लिप्त्वा श्वित्रं विनाशयेत् ॥ अथ सर्वेश्वरो रसः ॥ शुद्धं सूतं चतु
र्गंधं पलं यामं विचूर्णयेत् । ततताम्राभ्रलोहानां दरदं च पलं पलं । सुवर्णं रजतं चैव प्रत्येकं दशनिष्क
कं । माषैकं चन्द्रतं वज्रं तालं सत्वं पलद्वयं । जंबीरोन्मत्तवासाभिः ॥ रक्ता कंचुल कविषमुष्टिभिः । मर्द्यं हयारिजैर्द्रा राम: ६९
वैः प्रत्येकं च दिने दिनं । एवं सप्तदिनं मर्द्यं तद्गोलं वस्त्रवेष्टितं । वालुकायंत्रगं स्वेद्यं त्रिदिनं लघुवह्निना ॥
आदाय चूर्णयेत्तीक्ष्णं पलैकं योजयेद्धि बा । द्विपलं पिप्पलीचूर्णमिश्रं सर्वेश्वरो रसः । हिंगुजोलिह्यते दोषैः

ह्रा कनेरम

शुल्बमंडलकुष्ठनुत्॥ गोकुचीदेवकाष्टं चकर्षमात्रं सुचूर्णयेत्॥ लिहेदेरंडतैलाक्तमनुपानं सुखावहं॥ अथ पंचव
क्त्रो क्षीररसः॥ हेमाभ्रकं पंचपलिकं विशाला नक्रे घृते पचेत्॥ तक्रे जीर्णे समुद्धृत्य ततः क्षीरघृते पचेत्॥ क्षीरे जी
र्णे समुद्धृत्य क्षालयित्वा विशोधनं॥ तच्चूर्णितं पंचपलं मरिचानां पलद्वयं॥ पलैकं मूर्छितं सूतं मेकीकृत्वा
तु भक्षयेत्॥ निष्कैकं उत्रिकुष्ठघ्नः स्वर्णक्षीरी रसो ह्ययं॥ अथ मेहवज्रो रसः॥ भस्मसूतं मृतं कांतं वज्रभस्म लोह
शिलाजतु॥ शुद्धं ताप्यं शिला व्योषं त्रिफलां कोलबीजकं॥ कपित्थं रजनीचूर्णं भृंगराजेन भावयेत्॥ विंश
द्वारं विशोष्याथ मधुयुक्तं लिहेत्सदा॥ निष्कमात्रं हरेन्मेहान् मेहवज्रो रसो महान्॥ महानिंबस्य बीजानि पि
ष्ट्वा षट् संमितानि च॥ पलतंडुलतोयेन घृतनिष्कद्वयेन च॥ एकीकृत्य पिबेच्चानु हंति मेहं चिरंतनं॥ अ
थ वह्नि रसः॥ चतुःसूतस्य गंधो द्वौ रजनी त्रिफला शिवा॥ प्रत्येकं च द्विभागस्यात् त्रिवृज्जैपाल चित्रकं॥
प्रत्येकं च त्रिभागस्यात् त्र्यूषणं दंति गोक्षुरकं॥ प्रत्येकमष्टभागस्यात् दैकीकृत्य विचूर्णयेत्॥ जयंतीस्नुह योहर ४
योर्कं ग्निवह्नि वीर्णाग्नि तैलकैः॥ प्रत्येकं च क्रमाज्ज्ञाव्य सप्तवारं पृथक् पृथक्॥ महावह्नि रसो नाम निष्क
मुष्णजलैः पिबेत्॥ विरेचनं भवेत्तेन तक्रभक्तं ससैंधवं॥ दिनांते दापयेत् पथ्यं वर्जयेच्छीतलं जलं॥ सर्वो
दरहरः शोफो मूढवातहरः परः॥ अथ विद्याधरो रसः॥ गंधकं तालकं ताप्यं मृतं ताम्रं मनःशिला॥ शुद्ध
सोनमखी २

श्रा०
७०
पक्तिशूलेहि:

सूतं च तुल्यांशं मर्दयेद्द्रावयेद्दिनं पिप्पल्याः क्वकषाये एवं जंबीरेण भावयेत् ॥ निष्कार्द्धं भक्षयेत्तो द्वै
गुल्मप्लीहिकादिकं जयेत् ॥ रसो विद्याधरो नाम गोमूत्रं च पिबेदनु ॥ अथ पित्तनिर्नेत्रो रसः ॥ टंकणं हारितालं शृंगं स्वर्णं
शुल्वं मृतं रसः ॥ दिनैकं मार्द्दकद्रावैर्मर्द्यं रुध्वा पुटे पचेत् ॥ सैंधवं जीरकं हिंगु मध्वाज्याभ्यां लिहेदनु ॥
पंक्तिशूलहरः ख्यातो मासमात्रेन संशयः ॥ अथ शूलगजकेसरी रसः ॥ शुद्धसूतं द्विधा गंधं यामेकं मर्द्द
येद्दृढं ॥ द्वयोस्तुल्यं शुद्धताम्रं संपुटे तु निरोधयेत् ॥ ऊर्द्ध्वाधो लवणं दद्यात् भाण्डे धारयेद्दिनपंचकं ॥ ततो ग
जपुटे पक्त्वा स्वांगशीतं समुद्धरेत् ॥ संपुटं चूर्णयेत् सूक्ष्मं पर्णखंडे द्विगुंजकं ॥ भक्षयेत्सर्वशूलार्त्तो हिंगु
शुंठी च जीरकं ॥ वचा मरिचजं चूर्णं कर्षमुष्णजलैः पिबेत् ॥ असाध्यं नाशयेत् शूलं रसः शूलगजकेस
री ॥ अथ अग्नितुंडी वटी रसः ॥ शुद्धसूतं विषं गंधमजमोदा फलत्रयं ॥ सर्जिक्षारं यवक्षारं वह्निसैंधव
जीरकं ॥ सौवर्च्चलं विडंगानि सामुद्रं त्र्यूषणं समं ॥ विषमुष्टिं सर्वतुल्यं जंबीराम्लेन मर्दयेत् ॥ मरिचाभा व
टी स्यादेषा वह्निमांद्यप्रशांतये ॥ अथ अजीर्णकंटको रसः ॥ शुद्धसूतं विषं गंधं समं सर्वं विचूर्णयेत् ॥ मरिचं
सर्वतुल्यांशं कंटकार्याः फलद्रवैः ॥ मर्दयेद्भावयेत्सर्वमेकविंशतिवारकं ॥ वटी गुंजात्रयं खादेत्सर्वाजी
र्णप्रशांतये ॥ अजीर्णकंटकः सोयं रसो हंति विसूचिकां ॥ अथ मंथानभैरवो रसः ॥ मृतं सूतं मृतं ताम्रं हिं

राम:
७१

वंदालड्रोडेवासोलक्रेवीज १

कोडातुंबी

गुडुक्षरमूलकं। सैंधवं गंधकं तालं कटुकी चूर्णयेत्समं। पुनर्नवार्द्रवंदाली निर्गुंडी तंडुलीयकैः। तिक्तको
शातकी द्रावैर्दिनैकं मर्द्दयेदृढं। माषमात्रं लिहेत्क्षौद्रैः रसं मंथानभैरवं। कफरोगप्रशांत्यर्थं निंबक्वा
थं पिबेदनु। अथ वातनाशो रसः। सूतहाटकवज्राणि ताम्रलोहं च माक्षिकं। तालं नीलांजनं तुत्थं
माब्धिफेनं समांशकं। पंचानां लवणानां च भागमेकं विमर्द्दयेत्। वज्रिक्षीरैर्दिनैकं तु रुंध्वा धोभूधरे
पचेत्। माषैकं मार्द्रकद्रावैर्लेहयेद्वातनाशनं। पिप्पलीमूलजं क्वाथं सकृष्णमनुपाययेत्। सर्वान्
वातविकारांश्च निहंत्याक्षेपकादिकान्। अथ कनकसुंदरी रसः। कनकस्याष्ट शाणाः स्युः सूतो द्वाद
शभिर्मतः। गंधो पि द्वादशओक्तं ताम्रं शाणद्वयोन्मितं। अभ्रकस्याष्टनुः शाणं माक्षिकं च द्विशाणकं त्रि
वंगो द्विशाणः सौवीरं त्रिशाणं लोहमष्टकम्। विषं त्रिशाणिकं कुर्यात् लांगली पलसंमितां। मर्द्दये
द्दिनमेकं तु रसैरम्लफलद्भवैः। दद्यान्मूढपुटं वह्नौ ततः सूक्ष्मं विचूर्णयेत्। माषमात्रो रसो देयः सन्नि
पाते सुदारुणे। आर्द्रकस्य रसे रैवं रसोनस्वरसेन वा। किलासं सर्वकुष्ठानि वीसर्पं च भगंदरं। ज्वरंग
रमजीर्णं च जयेत्कुष्ठहरो रसः। अथ सन्निपातभैरवो रसः। रसो गंधस्त्रिकर्षेण कुर्यात्कज्जलिकां द्व
योः। ताराभ्रताम्रवंगाहिसारश्चैकैककार्षिकाः। शिग्रुज्वालामुखीशुंठी बिल्वभस्तंडुलीयकैः। प्रसे
सर्पकाला।

कं स्वरसैः कुर्यात्‌ यामैकैकं विमर्द्दयेत्‌। कृत्वा गोलं दृढं वस्त्रे लिवणक्षारेनूसेत्‌। काचभांडे ततः स्थाल्यां का
र॰ ७१ चकूपीं निवेशयेत्‌। वालुकाभिः प्रपूर्याथ वह्निर्यामद्वयं भवेत्‌। ततउद्धृत्य तं गोलं चूर्णयित्वा विमिश्रयेत्‌। प्र
वालचूर्णकर्षेण शाणमात्रं विषेण च। कुस्तुसर्पस्वगरलैर्दिवेलं भावयेत्ततः। तगरं मूसली मांसी हेमाक्षा
नलिनीद्वि॰ ५ वेतसः कणा। नीलिनीपत्रकं चैला चित्रकश्च कुठेरकः। पातु ध्यादेवदारु लीध तगस्त्र मुंडिका मधूक शुलंजन
मेनफलप ७१ जाती मंदनार सैरेषां विमर्द्दयेत्‌। प्रत्येकमेकवेलं च। ततः संशोष्य धारयेत्‌। बीजपूरार्द्रकद्रावैर्मरिचैः
षोडशोन्मितैः। रसोद्विगुंजप्रमितः सन्निपाते सुदीयते। प्रसिद्धोयं रसो नाम्ना सन्निपातस्य भैरवः। अथ
ग्रहणीकपाटरसः। तारमौक्तिकहेमानि सारश्चैकैकभागिकः। द्विभागो गंधकः सूतो त्रिभागो मर्द्दयेद्दिनं। क
पित्थस्वरसैर्गाढं मृगशृंगे ततः क्षिपेत्‌। पुटेन्मध्यपुटेनैव ततउद्धृत्य मर्द्दयेत्‌। बलारसैः सप्तवेला मपामार्ग
रसे त्रिधा। लोध्र प्रतिविषामुस्ताधातकीन्द्रयवाम्रता। प्रत्येकमेतत्स्वरसैर्भावनास्यात्त्रिधा त्रिधा। माषमा
त्रो रसो देयो मधुना मरिचैस्तथा। हन्यात्सर्वानतीसारान्ग्रहणीं सर्वजामपि। कपाटो ग्रहणीरोगे रसोयं व राम॰
ह्निदीपनः। अथ ग्रहणीवज्रकपाटरसः। मृतं ताम्रकं गंधं च वज्रं तारसटंकणं। अग्निमंथं वचा कुष्ठं सू ७१
तं तुल्यानि मात्सुधीः। ततो जयंती जंबीरभृंगद्रावैर्विमर्द्दयेत्‌। त्रिवासरं ततो गोलं कृत्वा संशोष्य धा

रयेत्। लोहपात्रे सराव्वं चदत्वोपरि विमुद्रयेत्। अधो वह्निं शनैः कुर्यात् यामार्द्धं ततउद्धरेत्। रसतुल्यां
प्रतिविषां दद्यान्मोचरसं तथा। कपित्थं विजयाद्रावैर्भावयेत्सप्तधाभिषक्। धातुकीइयवामुस्तं विल्व
धात्रीगुडूचिकां। एतद्रसैर्भावयित्वा वेल्लकैकं च शोषयेत्। रसवज्रकपाटाख्यं शालेकं मधुनालिहे
त्। वह्निं शुंठी विडं विल्वं लवणं चूर्णयेत्समं। विवेदुग्धानुनाचानुसर्वजां ग्रहणीं जयेत्। अथ मद
नकामदेवो रसः॥ तारं वज्रं सुवर्णं च ताम्रं गंधकसूतकं। लोहं क्रमात् द्विवृद्धानि कुर्याद्देतानि मात्रया। वि
मर्द्य कन्यकाद्रावैः न्यसेत्काचमये घटे। विमुद्य पिठरीमध्ये धारयेत्सैंधवैर्भृते। पिठरीं मुद्रयेत्सम्य
क् ततश्चुल्यां निवेशयेत्। वह्निं शनैः शनैः कुर्याद्दिनमेकं तदुद्धरेत्। स्वांगशीतं च सं चूर्ण्य भावये
कौंचबीजप दर्कदुग्धकैः। अश्वगंधा च काकोलीवानरी मुशली तुरा त्रिः त्रिवेलं रसैरासां पृथ्वतावद्यपीभ्र भावयेत्। तालमखाना
सित
सिंघाडे ४ पद्मकंदकसेरूणां रसैः काश्य स्पभावयेत्। कस्तूरी व्योष कर्पूरं कंकोलं लालवंगकं। सर्वं चूर्णं दश
मांशमेतच्चूर्णं विमिश्रयेत्। सर्वैः समां शर्करां च दत्वा शाणोन्मितं भवेत्। गोदुग्धं द्विपलेनैव मधुराह्ला पिवेत्
रसेवकः। अस्य प्रभावान्मोदर्पं बलं तेजो विवर्द्धते। तरुणीः रमयेद्बह्वीर्न च हानिः प्रजायते। अथ कुंद
कंसुंदरो रसः॥ सूतो वज्रमणिर्मुक्तास्तारहेमप्रवाललाभकं। रसैः कर्बांक्रिताल्पेतान्मर्द्दयेद्दरिमेदजैः॥

प्रवाल चूर्णं गंधकं द्विद्विकर्षं विमिश्रयेत् ॥ ततो भृंगं धात्रीस्वरसैर्विमर्द्य मृगशृंगकं ॥ द्विसप्ताहं तु पुटेत्
पक्वं भावयेद्वातुकी रसैः ॥ काकोली मधुकं मांसी बलात्रय विश्वं गुदं ॥ द्राक्षा पिप्पलवंशाकं वरी पर्णी चतु
ष्टयं ॥ पद्मक कर्केरुकं मधुकं नागकेसरी तथा ॥ भावयित्वा रसैरेषां शोषयित्वा विचूर्णयेत् ॥ एला त्वक्पत्र
कं मांसी लवंगागुरुकेशरं ॥ मुस्तं मृगमदः कृष्णा जलं चंदनं समं मिश्रयेत् ॥ एतच्चूर्णैः समभिर्तैः रसं कं
दर्पसुंदरं ॥ खादेत् शाणमितं रात्रौ सिता धात्री विदारिकां ॥ एतासां कर्षचूर्णेन सर्पिः कर्षेण संयुतं ॥
तस्यांते द्विपलं क्षीरं पिबेत्सुखितमानसः ॥ रमणीरमयेद्बह्वी नैहानिं क्वापि जायते ॥ अथ पञ्चलोहरसा
यनं ॥ शुद्धं रसेंद्रं भागैकं द्विभागं शुद्धगंधकं ॥ द्विपलं कज्जलिकां कुर्यात्तत्र तीक्ष्णभवं रजः ॥ क्षिप्त्वा कज्ज
लिकातुल्यं ग्रहरेकं विमर्दयेत् ॥ ततः कन्याद्रवैः घर्मे त्रिदिनं परिमर्दयेत् ॥ ततः संजायते तस्य सो
लोधन्मोष्मो महान् ॥ अथ तत्पिंडितं कृत्वा ताम्रपात्रेण धारयेत् ॥ मध्ये कुटीरस्य त्रिदिनानि विधार
येत् ॥ उद्धृत्य तस्मात्खल्वे च दिनं धर्मे निधाय च ॥ रसैः कुठारच्छिन्नायास्त्रिदिनं परिभावयेत् ॥ सं
शोष्य घर्मे क्वाथैश्च भावयेत्त्रिकटोस्त्रिधा ॥ वासामृता चित्रकाणां रसैर्भाव्यं पृथक्पृथक् ॥ लो
हपात्रे ततः द्विधा भावयेत्त्रिफलारसैः ॥ निर्गुंडी दाडिमत्वग्भिः वासा भृंगकुरंटकैः ॥ पाठा पाकंद लीद्रवैः

धा. ७२ कस्तूरी ७२

एलावर २

गच्छति

वनतुलसी रामः ७२

मोचके

बीजकस्य श्रृतेन वा। नीलिकालंबुषाद्रावैः बंबूलफलिकारसैः। भावयेत्त्रिस्त्रिवेलं च ततो नागबलारसैः
।शतावरीकोकिलाक्षभिः पातालगरुडीद्रवैः। त्रिस्त्रिवेलं यथालाभं भावयेदेभिरौषधैः। तस्मात्तल्लिहेद्द्वौ
द्वघृताभ्यां कोलमात्रकं। पलमात्रं बलाक्वाथं पिबेदस्यानुपानकं। मासत्रयाच्छीलितं स्यात्त्वलीप
लितनाशनं। मंदाग्निं श्लेष्मकासांश्च पांडुतां कफमारुतौ। पिप्पलीमधुसंयुक्तं हन्यादेतान्न संशयः॥
वातास्त्रमूत्रकृच्छ्रांश्च ग्रहणीं वातजां रुजं। चंडप्रं छिंजयेदेतत् छिन्नसत्वं मधुप्लवं। बलवर्णकरं हृद्य
मायुष्यं परमं स्मृतं। जयेत्सर्वामयान् कालादिदं लोहरसायनं। अस्मिन्नौषधमेतस्मिन्न दद्यात्कोलमा
त्रकं। कूष्मांडं तिलतैलं च माषान्नं राजिकां तथा। मद्यमम्लरसं चैव वर्जयेल्लोहसेवकः॥ ॐ॥ इति
श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने रसकल्पनाध्यायः॥ ॐ॥ इति
मध्यमखंडः॥ स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा। मज्जा च तं पिबेन्मर्त्यः किंचिदभ्युदिते रवौ॥
स्थावरो जंगमश्चैव द्वियोनिः स्नेह उच्यते॥ तिलतैलं स्थावरे च जंगमेषु घृतं वरं। ताभ्यां त्रिभिश्चतुर्भिस्तु यम
कस्त्रिवृतो महान्। त्र्यहं चतुरहं पंचाहं षडहं स्तथा। सप्तरात्रात्परं स्नेहः सात्मीभवति सेवितः। दोषका
लाग्निवयसां बलं दृष्ट्वा प्रयोजयेत्। हीनां च मध्यमां ज्येष्ठां स्नेहस्य मात्रां बुद्धिमान्। अमात्रया तथाऽका

सुधाहीनायर

ले मिथ्याहाराविहारिणः। स्नेहः करोति शोफार्शस्तन्द्रानिद्राविसंज्ञिताः॥ देयाद्दीप्ताग्नये मात्रा स्नेहस्य पल

रा० ७३ संमिता। मध्यमा स्यात्त्रिकर्षा स्याज्जघन्या च द्विकर्षिका॥ अथवा स्नेहमात्राः स्युस्तिस्रोऽन्याः सर्वसंमिता। अहोरा उत्रकारकी२

त्रेण महती जीर्यत्यह्ना तु मध्यमा। जीर्यत्यल्पा दिनार्द्धेन सा विज्ञेया सुखावहा। अल्पा स्याद्दीपनी वृष्या स्व

ल्पदोषा च हस्जिता। मध्यमा स्नेहनी ज्ञेया बृंहणी भ्रमहारिणी। ज्येष्ठा कुष्ठविषोन्मादग्रहापस्मारनाशिनी

। केवलं पैत्तिके सर्पिर्वातिके लवणान्वितं। पेयं बहुकफे वापि व्योषक्षारसमन्वितं। रूक्षक्षतविषार्त्तानां

वातपित्तविकारिणां। हीनमेधास्मृतीनां च सर्पिःपानं प्रशस्यते। क्रिमिकोष्ठानिलाविष्टप्रवृद्धकफमेद

सः। पिबेयुस्तैलसात्म्या ये तैलं दार्ढ्यार्थिनस्तु ये। व्यायामकर्शिताः शुष्करेतोरक्तमहारुजः। महाग्निमा

रुतप्राणा वसायोग्या नराः स्मृताः। क्रूराशयाः क्लेशसहा वातार्त्ता दीप्तवह्नयः। मज्जानं वापि बेयुस्ते स

र्पिर्वा सर्वतो हितं। शीतकाले दिवा स्नेहमुष्णकाले पिबेन्निशि। वातपित्ताधिके रात्रौ वातश्लेष्माधिके दि

वा। नस्याभ्यंजनगंडूषमूर्द्धकर्णाक्षितर्पणे। तैलं घृतं वा युंजीत दृष्ट्वा दोषबलाबलं। घृते कोष्णं जलं पेयं

तैले यूषः प्रशस्यते। वसामज्ज्ञोः पिबेन्मंडमनुपाने सुखावहं। स्नेहद्विषः शिशून्वृद्धान्सुकुमारान्कृशा राम: ७३

नपि। तृष्णालून्तुष्णकाले सह तक्रेण पाययेत्। सर्पिष्मती बहुतिला यवागूः स्वल्पतंडुला। सुखोष्णा सेव्या

मात्रानु सद्यः स्नेहनकारिणी। शर्कराचूर्णसंयुक्ते दोहनस्थे घृते तु गां। दुग्ध्वा क्षीरं पिबेद्रूक्षः सद्यः स्ने
हनमुच्यते। मिथ्याहाराद्विहाराच्च यस्य स्नेहो न जीर्यति। विष्टभ्य वापि जीर्येत वारिणोष्णेन वामयेत्॥
स्नेहस्याजीर्णशंकायां पिबेदुष्णोदकं नरः। ततो ग्नारो भवेच्छुद्धो भक्तं प्रति रुचिस्तथा। स्नेहेन पैत्तिक
स्याग्निर्यदातीक्ष्णतरीकृतः। तदासौ दीरयेत्तृष्णां विषमां तस्य पाययेत्। शीतं जलं वामयेच्च पिपासा
तेन शाम्यति। अजीर्णी वर्जयेत्स्नेहमुदरी तरुणज्वरी। दुर्बलोऽरोचकी स्थूलो मूर्छार्त्तो मेदपीडितः। द
त्तबस्तिर्विरिक्तश्च वान्तस्तृष्णासमन्वितः। अकालप्रसवा नारी दुर्दिने च विवर्जयेत्। स्वेद्यसंशोध्यमद्य
स्त्रीव्यायामासक्तचिंतकाः। वृद्धबालकृशारूक्षाः क्षीणास्राः क्षीणरेतसः। वातार्त्तास्तिमिरार्त्ताश्च ये तेषां स्नेह
नमुत्तमं। वातानुलोम्यं दीप्तोग्निर्वर्चः स्निग्धमसंहतं। मृदुस्निग्धांगता ग्लानिः स्नेहोद्वेगोऽथ लाघवं। वि
मलेन्द्रियता सम्यक् स्निग्धे रूक्षे विपर्ययः। भक्तद्वेषो मुखस्रावो गुददाहः प्रवाहिका। तन्द्रातिसारः पांडुत्वं
म्रंशं स्निग्धस्य लक्षणं। रूक्षस्य स्नेहनं स्नेहैरतिस्निग्धस्य रूक्षणं। श्यामाकचणकाद्यैश्च तक्रपिण्याक
शक्तुभिः। दीप्ताग्निः शुद्धकोष्ठश्च पुष्टधातुर्दृढेन्द्रियः। सुवीर्यबलवर्णाढ्यः स्नेहसेवी भवेन्नरः। स्नेहे व्याया
मसंशीतवेगाघातप्रजागरान्। दिवास्वप्नमभिष्यन्दि रूक्षान्नं च विवर्जयेत्॥ इति श्रीदामोदरसूनुनाश

ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने स्नेहपानविधिः॥ अथ स्वेदविधिः॥ स्वेदश्चतुर्विधः प्रोक्तस्तापोष्मा
शा. स्वेदसंज्ञितौ। उपनाहो द्रवः स्वेदः सर्वे वातार्तिहारिणः॥ स्वेदौ तापोष्मजौ प्रायः श्लेष्मघ्नौ समुदीरितौ॥ उपनाहस्तु वा
७४ तघ्नः पित्तसंसृष्टे द्रवो हितः। महाबले महाव्याधौ शीते स्वेदो महान्स्मृतः। दुर्बले दुर्बलः स्वेदो मध्ये मध्यतमो मतः। बला कफे वलवति वाते च
75 से रूक्षणः स्वेदो रूक्षस्निग्धः कफानिले। कफमेदोवृते वाते कोष्णगेहं रवेः करान्। नियुद्धं मार्गगमनं गुरुप्रावरणं मारीवत्वमेनाः
चिंताद्धिः ५ क्षुधं। विना व्यायाममभारं अभसेवेतामयमुक्तये। येषां नस्यं विधातव्यं वस्तिश्चापि हि देहिनां। शोधनीयाश्च ये
केचित्पूर्वं स्वेद्यास्ते मताः। स्वेद्याः पश्चात्त्रयो ग्लीहभगंदर्यर्शसस्तथा। अश्मर्याश्चातुरो जंतुः शमयेत्श
स्त्रकर्मणा। पश्चात्स्वेद्यो गते शल्ये मूढगर्भे गते तथा। काले प्रजाताऽकाले वा पश्चात्स्वेद्या नितंबिनी। सर्वान्स्वे
वातरहिते स्थाने अन्नपचेरहिते दान्निवाते च जीर्णाहारे च कारयेत्। स्वेदाः धातुस्थिता दोषाः स्नेहक्लिन्नस्य देहिनः। द्रवत्वं प्राप्य कोष्ठं तु ग
च्छन्ति विरेकतां। स्विद्यमानशरीरस्य हृदयं शीतलैः स्पृशेत्। स्नेहाभ्यक्तशरीरस्य शीतैराच्छाद्य चक्षुषी
हीद्धिः। अजीर्णी दुर्बलो मेदी क्षतक्षीणः पिपासितः। अतीसारी रक्तपित्ती पांडुरोगी तथोदरी। मदार्तो गर्भिणी चै मेद्धिः ३
व न हि स्वेद्या विजानता। एतानपि मृदुस्वेदैः स्वेदसाध्यानुपाचरेत्। मृदुस्वेदं प्रयुंजीत तथा हृन्मुष्कदृष्टि एमः
षु। अतिस्वेदात्संधिपीडा दाहस्तृष्णा क्लमो भ्रमः। पित्तास्रकोपः पिडिकाकोपस्तत्र शीतैरुपाचरेत्। नेपुता ७४

पाभिधः स्वेदो वालुकावस्त्रपाणिभिः। कपालकंदुकांगारैर्यथायोगं प्रयुंजति। ऊष्मस्वेदः प्रयोक्त
व्यो लोहपिंडेष्टकाश्मभिः। प्रतप्तैरम्लसिक्तैश्च कायेचार्द्रकवेष्टिते। अथवा वातनिघ्नौषधक्वाथको
ष्णरसादिभिः। उष्णैर्घटं पूरयित्वा पार्श्वे छिद्रं विधाय च। विमुच्यास्यं त्रिवंडीं च धातुजां काष्ठजां शु
भां। षडंगुलास्यां गोपुच्छां नाडीं युंज्याद्द्विहस्तिकां। सुखोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतं। हस्तिशुंडि ९
कया नाड्या स्वेदयेद्वातरोगिणं। अन्यच्च। पुरुषायाममात्रं वा भूमिमुत्कीर्य खादिरैः। काष्ठैर्दग्ध्वा।
तथाभ्युक्ष्य क्षीरधान्याम्लवारिभिः। वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेन्नरं। एवं माषादिभिः स्विन्नैः
इवातहरौषधैर्वि: शयानः स्वेदमाचरेत्। तथोपनाहस्वेदं च कुर्याद्वातहरं बुधः। प्रदिह्य देहं वातार्त्तं क्षीरमांसरसान्वितैः।
उत्पाद्धिः५ अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः। वनग्राम्यानूपमांसैर्जीवनीयगणेन च। दधिसौवीरक कांजी ५
भिलावा ४ क्षीरैर्वीरतर्वादिना तथा। कुलत्थमाषगोधूमैरतसीतिलसर्षपैः। शतपुष्पादेवदारुशेफालीस्थू धोहर सभालवा ४
कलौंजी ३ लजीरकैः। एरंडमूलबीजैश्च रास्नामूलकशिग्रुभिः। मिसिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः। प्र तुलवा तुलसी ३
सारणीश्वगंधाभ्यां बलाभिर्दशमूलकैः। गुडूच्या वानरीबीजैर्यथालाभं समाहृतैः। क्षुण्णैः स्विन्नैश्च व
स्त्रेण बद्धैः संस्वेदयेन्नरं। महाशाल्वणसंज्ञोयं योगः सर्वानिलार्तिहृत्। द्रवस्वेदस्तु वातघ्नः द्रव्यक्वा

येन स्वेदितं। कटाहे कोष्ठके वापि सूपविष्टोऽवगाहयेत्। नाभेः षडंगुलं यावन्मग्नः कायस्य धार
शा. ७५ या। कोष्णया स्कन्धयोः सिक्तः तिष्ठेत् स्निग्धतनुर्नरः। एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरं। एकांत
३धं रं द्व्यंतरं वा स्नेहो युक्तोऽवगाहने। जलसिक्तस्य वर्द्धंते यथा मूलेऽङ्कुरादयः। तथा धातुविवृद्धिर्हि स्नेह
75 सिक्तस्य जायते। नातः परतरः कश्चिदुपायो वातनाशनः। शीतशूलव्युपरमे स्तम्भगौरवनिग्रहे। दी
प्तेऽग्नौ मार्दवे जाते स्वेदनाद्विरतिर्मता। सम्यक् स्विन्नं विमृदितं स्नानमुष्णाम्बुना शनैः। भोजयेच्चा
नभिष्यंदि व्यायामं च न कारयेत्॥ ॐ ॥१००॥ ॥इति श्रीशार्ङ्गधरेण विरचितायां संहितायां
चिकित्सास्थाने स्वेदविधिरध्यायः॥ ॐ ॥ शरत्काले वसंते च प्रावृट्काले च देहिनां। वमनं रेचनं चै
व कारयेत्कुशलो भिषक्। बलवंतं कफव्याप्तं हृल्लासादिनिपीडितं। तथा वमनसात्म्यं च धीरचित्तं च
वामयेत्। विषदोषे स्तन्यरोगे मंदाग्नौ श्लीपदेऽर्बुदे। हृद्रोगे कुष्ठवीसर्पमेहाजीर्णभ्रमेषु च। विदा
रिकापचीकासश्वासपीनसवृद्धिषु। अपस्मारज्वरोन्मादे तथा रक्तातिसारिषु। नासाताल्वोष्ठपाके च राम: ७५
कर्णस्रावेऽधिजिह्वके। गलशुंड्यामतीसारे पित्तश्लेष्मगदे तथा। मेदोगदे रुचौ चैव वमनं कारयेद्भि
षक्। न वामनीयस्तिमिरी न गुल्मी नोदरी कृशः। नातिवृद्धो गर्भिणी च न स्थूलो न क्षतातुरः। मदा

शिरःशूले छिः २

सद्योज्वरे ऽतयौ सेवनं वांतिं कारयेद्भिषक् रानुदावर्त्त मूर्द्ध रक्तीच दुः छर्दिः केवल्यानिली । पाण्डुरोगी कृमिव्याप्तः पठनात्स्वरघातकी ॥ १

त्तौ बालकोरूक्षः क्षुधितश्च निरूहिकः । पीनेण जीर्णव्याधिता वाम्या ये विषपीडिताः । कफव्याप्ता
श्च ते वाम्या मधुकक्वाथपानतः । सुकुमारं कृशं बालं वृद्धं भीरुं च वामयेत् । पीत्वा यवागूमाकंठं क्षीर
तक्रदधीनि वा । असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लिश्य देहिनः । स्निग्धस्विन्नाय वमनं दत्तं सम्य
क् प्रवर्त्तते । वमनेषु च सर्वेषु सैंधवं मधु वा हितं । बीभत्सं वमनं दद्याद्विपरीतं विरेचनं । क्वाथद्रव्य
व स्य कुडवं श्रपयित्वा जलाढके । अर्द्धभागावशिष्टं च वमने ष्ववचारयेत् । क्वाथपाने नव प्रस्था ज्येष्ठा
मात्रा प्रकीर्त्तिता । मध्यमा षण्मिता प्रोक्ता त्रिप्रस्था च कनीयसी । कल्कचूर्णावलेहानां त्रिपलं श्रे
ष्ठमात्रया । मध्यमं द्विपलं विद्यात्कनीयस्तु पलं भवेत् । वमने चाष्ट वेगाः स्युरष्टौ पित्तांत उत्तमाः ।
षड्वेगो मध्यमो वेगाः चत्वारस्त्ववरा मताः । वमने च विरेके च तथा शोणितमोक्षणे । अर्द्धत्रयोदश
पलं प्रस्थमाहुर्मनीषिणः । कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् । सुस्वादुलवणाम्लो
रो०ऽ५।२ ष्णैः संसृष्टं वायुना कफं । कृष्णाराठफलैः सिंधुकफे कोष्णजलैः पिबेत् । पटोलवासानिंबैश्च पित्ते शी
तजलं पिबेत् । सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत् । अजीर्णे कोष्णपानीयं सिंधुं पीत्वा वमेत्
सुधीः । वमनं पाययित्वा च जानुमात्रासने स्थितं । कंठमेरंडनालेन स्पृष्टं तं वामयेद्भिषक् । प्रसेको

शा॰
७६
76

हृद्ग्रहः कोठः कंडूः दुर्गंधिर्द्दितिर्भवेत्। अतिवांते भवेत्तृष्णा हिक्कोद्गारो विसंज्ञिता। जिह्वानिःसरणं चाक्ष्णो
र्व्यावृत्तिर्हनुसंहतिः। रक्तच्छर्दिः ष्ठीवनं च कंठपीडा च जायते। वमनस्यातियोगे तु मृदु कुर्याद्विरेचनं। व
मनातः प्रविष्टायां जिह्वायां कवलग्रहः। स्निग्धाम्ललवणैर्हृद्यैर्घृतक्षीररसैर्हितः। फलान्यम्लानि
खादेयुः तस्य चान्ये पुरतो नराः। निःसृतां तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत्। व्यावृत्ते दृशि घृताभ्यक्ते पी
डयेच्च शनैः शनैः। हनुमोक्षे स्मृतः स्वेदो नस्यं च श्लेष्मवातनुत्। रक्तपित्तविधानेन रक्तच्छर्दिमुपाचरे
त्। धात्रीरसांजनोशीरलाजाचंदनवारिभिः। मंथं कृत्वा पाययेच्च सघृतक्षौद्रशर्करं। साम्यत्यनेन तृ
ष्णाद्याः पीडाश्छर्दिसमुद्भवाः। हृत्कंठशिरसां शुद्धिर्दीप्ताग्नित्वं च लाघवं। कफपित्तविनाशश्च सम्य
ग्वांतस्य चेष्टितं। ततोऽपराह्णे दीप्ताग्निं मुद्गषष्टिकशालिभिः। हृद्यैश्च जांगलरसैः कृत्वा यूषं च
भोजयेत्। तंद्रानिद्रास्यदौर्गंध्यकंडूं च ग्रहणीविषं। सुवांतस्य न पीडायै भवंत्येते कदाचन। अजीर्णं
शीतपानीयं व्यायामं मैथुनं तथा। स्नेहाभ्यंगं प्रकोपं च दिनैकं वर्जयेत्सुधीः॥ ॥ इति श्रीदामोद
रसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने वमनविधिरध्यायः॥ ॥ अथ राम:
विरेचनविधिः। स्निग्धस्विन्नस्य वांतस्य दद्यात्सम्यक् विरेचनं। अवांतस्य त्वधः स्रस्तो ग्रहणीं ७६

छादयेत्कफः। मंदाग्निं गौरवं कुर्याज्जनयेद्वा प्रवाहिकां। अथवा पाचनैरामं बलासं वापि पाचयेत्। स्नि
ग्धस्य स्नेहनैः कार्यं स्वेदैः स्विन्नस्य रेचनं। शरदृतौ वसंते च देहशुद्ध्यै विरेचनं। अन्यदात्ययिके कार्ये
शोधनं शीलयेद्बुधः। पित्ते विरेचनं युंज्यादामोद्भूते गदे तथा। उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः। दो
षाः कदाचित्कुप्यंति जिता लंघनपाचनैः। ये तु संशोधनैः शुद्धा न तेषां पुनरुद्भवः। बालवृद्धावतिस्निग्ध
क्षतक्षीणभयान्विताः। श्रांतस्तृष्णार्त्तः स्थूलश्च गर्भिणी च नवज्वरी। नवप्रसूता नारी च मंदाग्निश्च म
दात्ययी। शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता। जीर्णज्वरी गरव्याप्तो वातरक्ती भगंदरी। अर्शः
पांडूदरी ग्रंथी हृद्रोगारुचिपीडितः। योनिरोगप्रमेहार्त्तो गुल्मप्लीहव्रणार्दिताः। विद्रधिच्छर्दिविस्फो
टविसूचीकुष्ठसंयुताः। कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः। प्लीहशोथाक्षिरोगार्त्ताः कृमिक्षा
रानलार्दिताः। शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः। बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्य
मः। बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते। मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा। क्रूरे ती
क्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः। मृदुर्द्राक्षापयश्चंचुतैलैरपि विरिच्यते। मध्यमस्त्रिवृतातिक्ता
राजवृक्षैर्विरिच्यते। क्रूरस्तु स्नुक्पयसा हेमक्षीरीदंतीफलादिभिः। मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफ

विरेचनं विना यद्गुप्तचारेण स्यात् =२

चोक १ बाधककाक २

वि० फाणितिका। वेगैर्विपक्वनिर्मध्या हीनोत्कृष्टा दश वेगकैः। द्विपलं श्रेष्ठमाख्यातं मध्यमं च पलं भवेत्। पलार्द्धं
ग्र. च कषायाणां कनीयस्तु विरेचने। कल्कमोदकचूर्णानां कर्षं मध्वाज्यलेहितः। कर्षद्वयं पलं वापि वयोरो
७१ गाद्यपेक्षया। पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत्। त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दि
77 तः। त्रिवृत्सैंधवशुंठीनां चूर्णमम्लैः पिबेन्नरः। वातार्दितो विरेकाय जांगलानां रसेन च। एरंडतैलं त्रि
फलाक्वाथेन द्विगुणेन वा। युक्तं पीतं पयोभिर्वा न चिरेण विरिच्यते। त्रिवृता कौटजं बीजं चैव पिप्पली विश्व इंद्रयव
भेषजं। समृद्वीकारसं क्षौद्रं वर्षाकाले विरेचनं। त्रिवृद्दुरालभामुस्तशर्करोदीच्यचंदनं। त्रिवृता श जवासा
र्करातुल्यं ग्रीष्मकाले विरेचनं। द्राक्षांबुना सयष्ट्याह्वं शीतलं च घनात्यये। त्रिवृतां चित्रकं पाठामज
जाजीं सरलं वचां। हेमक्षीरीं च हेमंते चूर्णमुष्णांबुना पिबेत्। पिप्पलीं नागरं सिंधुश्यामां त्रिवृतया
सह। लिहेत्क्षौद्रेण शिशिरे वसंते च विरेचनं। अभयां मरिचं शुंठीं विडंगामलकानि च। पिप्पलीपि
प्पलीमूलं त्वक्पत्रं मुस्तमेव च। एतानि समभागानि दंती च त्रिगुणा भवेत्। त्रिवृता अष्टगुणा ज्ञेया एमः
षड्गुणा चात्र शर्करा। मधुना मोदकान् कृत्वा कर्षमात्रान्प्रमाणतः। एकैकं भक्षयेत्प्रातः शीतं चानु ७१
पिबेज्जलं। तावद्विरिच्यते जंतुर्यावदुष्णं न सेवयेत्। पानाहारविहारेषु भवेन्निर्यंत्रतः सदा। वि

ष्ममज्वरमंदाग्निपांडुकास्यभगंदरान्॥ दुर्नामकुष्ठगुल्मार्शोगलगंडभ्रमोदरान्॥ विदाहप्लीहमे-
हांश्च यक्ष्माणं नयनामयान्॥ वातरोगांस्तथाध्मानं मूत्रकृच्छ्राणि चाश्मरीं॥१२॥ पृष्ठपार्श्वोरुजघन-
दे॰ कां २ जंघोदररुजं जयेत्॥ सततं शीलनादेषां पलितानि विनाशयेत्॥ अभयामोदकाह्येते रसायन-
पराः स्मृताः॥ इत्यभयामोदकः॥ पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी॥ सुगंधि किंचिदा-
घ्रायतो मूलं शीलयेद्गृहं॥ न वातस्थो न वेगांस्तु धारयेन्न स्वपेत्तथा॥ शीतांबु नास्पृशेत्क्वापि को-
ष्णनीरं पिबेन्मुहुः॥ बलासौषधपित्तानि वायुर्वा तैर्यथा व्रजेत्॥ विरेके च मलं पित्तभेषजं च कफो व्र-
जेत्॥ विरेचनानां सर्वेषां रथ्यन्नं तमने हितं॥ आमवाते प्रदातव्यमन्यथामुद्गयूषकं॥ दुर्विरक्त-
स्य नाभेस्तु स्तब्धत्वं कुक्षिशूलता॥ पुरीषवातसंगश्च कंडूमंडलगौरवाः॥ विदाहोऽरुचिराध्मानं भ्रमः
छर्दिश्च जायते॥ तं पुनः पाचनैः स्नेहैः पक्त्वा संस्वेद्य रेचयेत्॥ तेनास्योपद्रवा यांति दीप्ताग्निर्लघु-
कांचनिकलश ता भवेत्॥ विरेकस्यातियोगेन मूर्छा भ्रंशो गुदस्य च॥ शूलं कफातियोगः स्यान्मांसधावनसंनिभं
हे ३ मेदोनिलेजलाभासं रक्तं चापि विरिच्यते॥ तस्य शीतांबुभिः सिक्त्वा शरीरं तंडुलांबुभिः॥ मधुमिश्रै-
स्तथा शीतैः कारयेद्वमनं मृदु॥ सहकारत्वचः कल्कोदध्ना सौवीरकेन वा॥ पिष्ट्वा नाभिप्रलेपेन तु

कां॰ जी॰ २

हृत्पतीसारमुल्वणं। आजं क्षीरं रसं वापि वै श्करं हारिणं तथा। शालिभिः षष्टिकैः स्वल्पं मसूरैर्वापियो
शा जयेत्। शीतैः संग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक्। लाघवे मनसस्तुष्टावनुलोमं गतेऽनिले। सुविरि
७८ क्तं नरं ज्ञात्वा पाचनं पाययन्निशि। इंद्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तता। धातुस्थैर्यं वयःस्थै
78 र्यं भवेद्रेचनसेवनात्। प्रवातसेवां शीतांबु स्नेहाभ्यंगमजीर्णतां। व्यायामं मैथुनं चैव न सेवेत विरे
चितः। शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत्कृतां। जांगलाविष्करणां वा रसैः शाल्योदनं हितं॥
इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्थाने विरेचनविधिरध्यायः
॥ अथ वस्तिविधिः॥ वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परं। यः स्नेहैर्दीयते स स्यात् अनुवास
ननामतः। कषायक्षीरतैलैर्यो निरूहः स निगद्यते। वस्तिभिर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः
। तत्रानुवासनाख्यो हि वस्तिर्यः सोत्र कथ्यते। एवमेव ततो वस्तिर्निरूहाख्यो भविष्यति। निरू
हादुत्तरं चैव वस्तिः स्यादुत्तराभिधः। अनुवासनभेदश्च मात्रावस्तिरुदीरितः। पलद्वयं तस्य मा रामः
त्रा तस्मादर्धापि वा भवेत्। अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः केवलानिली। नानुवास्यस्तु कु ७८
ष्ठी स्यान्मेही स्थूलस्तथोदरी। नास्थाप्या नानुवास्याः स्युरजीर्णोन्मादतृड्युताः। शोकमूर्छारु

शिलागोमूत्रकुष्ठतोरसः। मुखकांतिकरो लेपः पिटकाव्यंगकीलजित्। लोध्रधा
न्यवचालेपः स्त्रीरुणयपिटकापहः। तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनात्। सि समधुनकु
द्धार्थकवचालोध्रसैंधवैश्च प्रलेपयेत्। व्यंगे चार्जुनत्वग्वा मंजिष्ठा वा समाक्षि
का। लेपः सनवनीतो वा श्वेताश्वखुरजो मषी। अर्कक्षीरहरिद्राभ्यां मर्दयित्वा
विलेपनात्। मुखकार्ष्ण्यं प्रशमं याति चिरकालोद्भवं ध्रुवं। वटस्य पांडुपत्राणि मा
लिती रक्तचंदनं। कुष्ठं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत्। तारुण्यपिडिका गोमूत्रेण
व्यंगनीलिकादिविनाशनं। पुराणमधूच्छिष्टपिण्याकं पुरीषं कुकुटस्य च। मूत्रपिष्टः पिष्टः
प्रलेपोयं शीघ्रं हन्यादरूंषिकां। खदिरारिष्टजंबूनां त्वग्भिर्वा मूत्रसंयुतैः। कु
टजत्वक्सैंधवं वा लेपो हन्यादरूंषिकां। पिप्पलीबीजमधुककुष्ठमाषैः स
सैंधवैः। कायो दारुणके मूर्ध्नि प्रलेपो मधुसंयुतः। दुग्धेन खसखस संलेपो दारुणं खसखस ४
च जयेद्ध्रुवं। आम्रबीजस्य चूर्णं तु त्रिफलाचूर्णं समं द्वयं। दुग्धपिष्टः प्रलेपोयं दारु
णं हंति दारुणं। रसास्तिक पटो[illegible]टा तस्य पत्राणां तद्विलेपनात्। इंद्रलुप्तं प्रणाशं
याति त्रिभिरेव दिनैर्ध्रुवं। इंद्रलुप्तापहो लेपो मधुना बृहतीरसः। गुंजामूलफलं

वापि भल्लातकरसेनापि वा। गोक्षुरतिलपुष्पाणि तुल्यं च मधुसर्पिषी। क्षीरस्य प्र
लेपनं तेन केशाः स्युर्वर्द्धनं परं। हस्तिदंतमषीं कृत्वा छागदुग्धं रसांजनं। रोमाण्ये
८१ तेन जायंते तलेपाणितलेष्वपि। यष्टीदावरमंडीका तैलाज्यक्षीरलेपनैः। इंद्र
८१ लुप्तः शमं याति केशाः स्युः सघना दृढाः। चतुःपदानां त्वग्लोमनखशृंगास्थि
भस्मभिः। तैलेन सह लेपोयं लोमसंजननः परः। अयोरजो भृंगराजो [illegible] त्रिफ
ला कृष्णमृत्तिकाः। स्थिता इक्षुरसे मासं लेपनात् पलितं जयेत्। धात्रीफलद्व
यं पथ्या ह तथैकं बिभीतकं। पंचाम्रमज्जा लोहस्य कर्षैकं च प्रदीयते। पिष्ट्वा लो
हमये भांडे स्थापयेदुषितं निशि। लेपोयं हंति नाचिरादकालपलितं महत्। त्रिफ
संभालुके पत्रं ला नीलिकापत्रं लोहं भृंगरजः समं। अविमूत्रेण संपिष्टं लेपात् कृष्णीकरं स्मृतं
। त्रिफला लोहचूर्णं च दाडिमत्वग्विभीतकं तथा। मूलकं पंचपलिकं चूर्णं कृत्वा विचक्ष ८१
णः। भृंगराजरसस्यापि प्रस्थमेकं च दापयेत्। स्थित्वा लोहमये पात्रे भूमिम
घ्ये निधापयेत्। मासमेकं ततः कुर्यात् छागीदुग्धेन लेपनं। कूर्चं शिरसि रा
त्रौ च संवेष्ट्य एरंडपत्रकैः। स्वपेत् प्रातः ततः कुर्यात् स्नानं तेन न च जायते। पलितस

विनाशश्च त्रिभिर्लेपैर्न संशयः। शंखचूर्णस्य भागौ द्वौ तालकं चैकभागकं। मनःशि
ला चार्द्धभागा स्यात् सर्जिका चैकभागिका। लेपोऽयं वारिपिष्टस्तु केशानुत्पाट्य दीयते। अन
या लेपयुक्त्या च सप्तवेलं प्रयुक्तया। निर्मूले केशस्थाने स्यात् तपनस्य हि रोमयथा।
तालकं शुणलायुग्मं स्यात् षड्भागं शंखचूर्णकं। द्विशाणकं पलाशस्य क्षारं दत्वा च मर्द
येत्। कदलीदंडतोये न रविपक्वरसेन वा। अस्यापि सप्तभिर्लेपैः रोम्णां पातनमुत्तमं।
सुवर्णपुष्पी कासीसं विडंगानि मनःशिला। रोचना सैंधवं चैव लेपनात् श्वित्रनाश
काक नं। वायस्येरंगजा कुष्ठं कृष्णा निर्गुटिका कृता। वस्त्रमूत्रेण संपिष्टा प्रलेपात् श्वित्रना
कोदुं शिनी। तालकः शुणमात्रः स्यात् पलशुण्ठी च वाकुची। गोमूत्रपिष्टं तच्चूर्णं लेपनात् श्वि
त्रनाशिनी। वाकुची वेतसो लाक्षा काकोदुंबरका कणा। रसांजनमयश्चूर्णं तिला हिमा
आमलेरालं स्तदेकतः। चूर्णयित्वा गवां मूत्रैः पिष्ट्वा च गुटिका कृता। अस्याः प्रलेपात् श्वित्राणि शुण कोजी
ह्यं त्यपि वेगतः। धात्री सर्जरसश्चैव यवक्षारश्च चूर्णितः। सौवीरेण प्रलेपोऽयं पूर्ववत्तु
सिध्मनाशनः। शाबीमूलकबीजानि तालकं सुरदारु च। तांबूलपत्रसहितानि कांजिकानि
ष्टयकृत्पृथक्। शंखचूर्णगुणमात्रैः सर्वान्येकत्र कारयेत्। लेपोऽयं वारणापिष्टः सिध्म
नो नाशनः परः। हरीतकी सैंधवं च गैरिकं च रसांजनं। बिडालको जलापिष्टः सर्वनेत्राम
बहिर्लेपः बिडालकः नाम =

दूर्वाभयासैंधवंच चक्रमर्दकुठेरकः। तक्रपिष्टकयुतो लेपः कंडूदद्रूविनाशनः ५ (वनतुलसी)

पापहः। रसांजनं व्योषयुतं संविषं ववरकीकृतं। कंडूपाकान्विताहंति लेपादंजनवनाभि
गुहेंज कां। प्रपुन्नाटस्य [illegible] बीजानि वाकुचीसर्षपास्तिलाः। कुष्ठं निशाद्वयं मुस्तं पिष्टं तक्रे
नीर ण चैकतः। प्रलेपाद्दस्य नश्यंति कंडूदद्रूविचर्चिकाः। हिमन्तौरा विडंगानि दूरदंगधकस्त
पमाद था। दद्रुघ्नः कुष्ठसिंदूरं सर्वाल्पिकेन मर्दयेत्। धत्तूरनिंबतांबूलपत्राणां स्वरसैः पृथक्।
८८ पुनःस्य प्रलेपमात्रेण पामादद्रूविचर्चिकाः। कंडूश्च रकसाश्चैव प्रशमं यांति वेगितः। हरजरस ५
४४ वीनिंबयुतो लेपः कंडूपामाविनाशनः। कृमिदद्रूहरश्चैव प्रीतापित्तापहः स्मृतः। सि
द्धार्थी रजनी कुष्ठं प्रपुन्नाटं तिलैः सह। कटुतैलेन संमिश्रं लेपनं कंडूदद्रुनुत्। रामा
कमलडोडे नीलोत्पलं दारुचंदनं मधुकं बला। घृतक्षीरयुतो लेपो विसर्पाग्निलनाशनः। न
लं वंदनं लोध्रमुश्रीरं कमलोत्पलं। शारिवामलकीपद्मा लेपः पित्तविसर्पनुत्।
त्रिफलापद्मकोशीरसमंगाकरवीरकं। नलमूलमनंतां च लेपः श्लेष्मविसर्पहा।
मांसी सर्जरसो लोध्रं मधूकं सहरेणुच। सर्वानीलोत्पलं पद्मं शिरीषकुसुमैः सह। ८८
प्रलेपः पित्तवातास्त्रे शतधौतघृतप्लुतः। आमलं घृतसंपिष्टं तु पिष्टं कांजिकवारिभिः।
जयेत्सर्वं प्रलेपेन रक्तं नासिकया च्युतं। कुष्ठमेरंडतैलेन लेपात्कांजिकपेषितं
रात्रिवातजां हन्यात्पुष्पं वामेचकुंदजं। देवदारु नतं कुष्ठं नलदं विश्वभेषजं। सकांजि

नतागर १ मूलं चक्रि० = २

कस्नेहयुक्तो लेपो वातशिरोर्तिनुत्। चंदनोशीरयष्ट्याह्वबलाव्याघ्रनखोत्पलैः।
क्षीरपिष्टैः प्रलेपः स्याद्दाहपित्तशिरोर्तिनुत्। धात्रीकसेरुह्रीबेरपद्मपद्मकचंदनैः।
दूर्वाक्षीरनलानां च मूलैः कुर्यात्प्रलेपनं। शिरोर्तिं पित्तजां हन्याद्रक्तपित्तरुजं तथा।
हरेणुनतशैलेयमुस्तैलागुरुदारुभिः। मांसीरास्नोरुबूकैश्च कोष्णो लेपः कफा
र्तिनुत्। शुंठीकुष्ठप्रपुन्नाटदेवकाष्ठैः ससैंधवैः। मस्तुपिष्टैः सुखोष्णैश्च लेपः
श्लेष्मशिरोर्तिनुत्। सारिवाकुष्ठमधुकवचाकृष्णोत्पलैस्तथा। लेपः सकांजिकः
स्नेहः सूर्यावर्तार्धभेदयोः। वरीनीलोत्पलं दूर्वा तिलाः कृष्णाः पुनर्नवाः। सार्धकेनत
वाते च लेपः सर्वशिरोर्तिनुत्। अथ लेपविधिस्त्वन्यः प्रोच्यते मुनिसंमतः। दे तस्य
कथिता भेदाः प्रलेपाख्यप्रदेहकौ। चमर्दिमाहिर्वे यद्वयोर्नतसामिति स्तयोः। शीत
स्तनुर्विशोषी च प्रलेपः परिकीर्तितः। आर्द्रो घनस्तथोष्णश्च स्यात्प्रदेहः श्लेष्मवात
त। तौ माणिमुखमादेयो प्रलेपाख्यप्रदेहको। वीर्यसम्पन्निर्णं स्याच्छु रोमकूपैः शि
रामुखैः। न रात्रौ लेपनं कुर्याद्धृतं च पलितं तथा। न च पर्युषितं चापि शुष्यमाणं न धा
रेत्। मुबचेदेत त प्रदेहं पीडनं प्रतिजायते। तमसा पिहितो सूक्ष्मा रोमकूपमुखाश्रितः।
दिवालेपेन नियाति रात्रौ नालेपयेदतः। रात्रावपि प्रलेपो हि विधिः कार्यो विचक्षणैः।

शुष्कमानमुपेक्षेत =२ शुष्कमानं न धारयेतर्हि =२

म पाकि शोथे गंभीरे रक्तमोक्षसमुद्भवे। आदौ शोथहरो लेपो द्वितीयो रक्तशोधनः।
तृतीयश्चोपनाहः स्याच्चतुर्थः पाटनक्रमः। पंचमः शोधनो भूयात्षष्ठो रोपणमुच्य
५८ ४१ ते। सप्तमो वर्णकरणो व्रणस्यैते क्रमा मताः। सयथा। वीजपूरजटा हिंस्रा देवदारु महौ हिंगु हि॰ २
षधं। रास्नाग्निमंथलेपोयं वातशोथविनाशनः। मधुकं चंदनं दूर्वा नलमूलं च पद्म
मकं। उशीरं वालकं पद्मं पित्तशोथप्रलेपनं। कृष्णा पुराणपिण्याकं शिग्रुत्वक्सिक
ताशिवा। मूत्रपिष्टः सुखोष्णोयं प्रदेहः श्लेष्मशोथहा। देमिश्रे चंदने द्वे चाशिवा दूर्वा
पुनर्नवा। उशीरं पद्मकं लोध्रं गैरिकं चरसांजनं। आगंतुके रक्तजे च शोथे कुर्यात्प्रलेप
शणमूलादि नं। शणमूलकशिग्रूणां फलानि तिलसर्षपाः। शक्तवः किण्वमतसी प्रदेहः पाच खल=८
नः स्मृतः। दंती चित्रकमूलत्वक्स्नुह्यर्कपयसा गुडः। भल्लातकास्थिकासीसं
करनुवा=६ धवैर्दारणं स्मृतः। चिरविल्वाग्निकौ दंती चित्रको हयमारकः। कपोतकंकगृध्रा काकादि॰ ६
णां मलं लेपनदारणं। सर्जिकायावशूकाद्याः क्षारा लेपनदारुणाः। हेमक्षीर्याः प्त ८९
विल्वदि॰ ४ पालेपो व्रणलेपरमदारुणः। तिलसैंधवयष्ट्याह्वा निंबपत्रनिशायुगैः। त्रिवृद्घृतयुतैः
पिष्टैः प्रलेपो व्रणशोधनः। निंबपत्रं घृतं क्षौद्रं दार्वी मधुकसंयुतः। तिलेभ्यः सह से
युक्तो लेपः शोधनरोपणः। करंजारिष्टनिर्गुंडीलेपो हन्याद्व्रणक्रिमीन्। लशुनस्याथ
वा=२ वा लेपो हिंगुनिंबभवोथवा। निंबपत्रं तिलादंती त्रिवृत्सैंधवमाक्षिकं। दुष्टव्रणप्र

शमनो लेपः शोधनरोपणः। मदनस्य फलं तिक्तां पिष्ट्वा कांजिकवारिणा। कोष्णं कुर्या
न्नाभिलेपो शूलं शांतिं भवेत्ततः। शिग्रुमूले कालिके रंडयवगोधूमसमुद्रकैः। सुखोष्णो
शतावरः४ बहलो लेपः प्रयोज्यो वातविद्रधौ। पैत्तिके सर्पिषा लाजामधुकैः शर्करान्वितैः। प्र
लिपेत्क्षीरविषे वा पयस्याशीरचंदनैः। इष्टकासिकतालोहकिट्टगोशकृता सह। सु
खोष्णाश्च प्रदेहा स्युर्मूत्रैः स्यात् श्लेष्मविद्रधौ। रक्तचंदनमंजिष्ठानिशामधुकगैरिकैः।
क्षीरेणु विद्रधौ लेपो रक्तागंतुनिमित्तजे। शिग्रुबीजानि दशमूलमथापि वा
अम्लेन वातगंडे तु सुखोष्णः संप्रदीयते। देवदाली विशाले तु कफगंडप्रदेहकः। सर्षि
पारिष्टपत्राणि दग्ध्वा भल्लातकैः सह। छागमूत्रेण संपिष्टमपचीग्रंथिलेपनं। स
र्षपानि शिग्रुबीजानि शणबीजातसीयवान्। मूलकस्य च बीजानि तक्रेणाम्लेन पे
षयेत्। गंडमालार्बुदं गंडं लेपेनानेन साम्यति। प्रलिप्ते त्वान्तरे लोगं केवलानिलपी
डितं। तत्र प्रदेहं दद्यात् बिल्वगुंजाफलैः कृतं। तेनाव वाहजापीडा विशिष्यन्ति गच्छति त श्वेतपुनर्नवा=१
पा। अन्यापि वातजा पीडा प्रशमं याति विगतः। धत्तूरैरंडनिर्गुंडीवर्षाभूशिग्रुसर्षपैः। प्र
लेपः श्लीपदं हंति चिरोत्थमपि दारुणं। अजाजी हवुषा कुष्ठमेरंडवदरान्वितं। कांजि जीरस्याहे=२
केन च संपिष्टं कुरंडघ्नं प्रलेपनं। करवीरस्य मूलेन पारिपिष्टेन वारिणा। असाध्या
अंडहस्र=१

पिब्रजत्पस्तं । लिंगोत्थ्याः कुंकुप्रलेपनात् । देहे त्वक् दाहे त्रिफलां तां मवीं मधुसंयु

९० तां । उपदंशे प्रलेपोयं सद्यो रोपयति व्रणं । रसांजनं शिरीषेण पथ्यया च समन्वि

तं । सक्षौद्रं लेपनं योज्यमुपदंशगदापहं । अग्निदग्धेतु गम्भीरी प्लक्षे चंदनगैरिकैः

। सामृतैः सपिबा त्विग्धे शालपंकाय थे द्विपकः । तिंदुकी त्वक्कषाये वा घृतमि

श्रैः प्रलेपनात् । यवान् दग्ध्वा मषी कार्या तैलेन युतया तया । दग्धात्स वाग्निदग्धे

षु प्रलेपव्रणरोपणं । पिलाशोदुंबरफलैस्तिलतैलसमन्वितैः । मधुना पानिमालि

प्य गाढीकरणमुत्तमं । मांकंदमूलसंयुक्त मधुकार्द्र लेपनात् । गतेयौवनोच नारीणां

प्रसूताप्यस्तता भवेत् । दाडिमी त्वग्जलेनैव स्तालनं च मुहुर्मुहुः । मम स्त्वं सैंधवं स्तना

तगरं बृहती फलं । अपामार्गस्तिलाः कुष्ठं यवमाषाश्च सा वचाः । अश्वगंधा घृतचूर्णं

मधुना सह योजयेत् । अस्य संततलेपेन मर्दनाच्च प्रजायते । लिंगवृद्धिः स्तनौ स्तैंध

संहस्तिभुजकर्णयोः । सिताश्वगंधा सिंधूत्थगम्भीरघृते पचेत् । तैलं पानमर्दनात्

लिंगवृद्धिः संजायते परा । इंद्रवारुणिका पत्ररसैः सतैर्विमर्दयेत् । [illegible] कारवीर १०

स्य का [illegible] मुहुर्मुहुः । तल्लिप्तलिंगसंभोगाद्योनिद्रावो [illegible] जायते । तां [illegible] चूर्ण

तु चूर्णं कुष्ठं शिवाभवं । वारि [illegible] लेपनं कुर्याद् [illegible] नाशनं । कुलेस्य [illegible] कवः

कुब्जत्रिकाभवं स्तितिं =
कष्टर =

कुष्ठं मांसी चंदनं जं रजः। शक्तावश्वगंधकस्यैव वल्कं चैव कत्र कारयेत्। स्वेददोर्गं
ध्यनाशश्च जायते स्या वधूलनात्। वचा सोवर्चलं कुष्ठं रजन्यो मरिचानि च। एत
ल्लेपप्रभावेन वशीकरणमुत्तमं। अथ मरूईतैलं। अभ्यंगपरिषेकश्च शिरोबस्ति
रिति क्रमात्। मरूईतैले चतुर्धा स्यादुत्तरोत्तरं। त्रयोभ्यंगादयः पूर्वं प्रसिद्धः
सर्वतः स्मृताः। शिरोबस्तिविधिश्चात्र प्रोच्यते मुनिसंमतः। शिरोबस्तिचर्मणः
स्याद्विमुखो द्वादशांगुलं। शिरःप्रमाणं तं बध्वा मस्तके माषपिष्टकैः। संधिरोधं
विधायास्य स्नेहैः कोष्णैः प्रपूरयेत्। तावद्धार्यस्तु यावत्स्यान्नासाकर्णमुख
स्रुतिः। वेदनोपशमो वापि मात्राणां वा सहस्रकं। विना भोजनमेवात्र शिरो
बस्तिः प्रशस्यते। प्रयोज्यस्तु शिरोबस्तिः पंच सप्ताहमेव वा। विमुच्य शिरसो ब
स्तिं वैं गृह्णीयाच्च समं ततः। ऊर्ध्वं कार्यं ततः कोष्णनीरैः स्नानं च कारयेत्। अने
न दुर्जया रोगाः पंच सप्ताहमेव वा॥ विमुच्य शिरसो बस्तिं गृह्णीयाच्च समं ततः। ऊ
र्ध्वं कार्यं ततः कोष्णनीरैः स्नानं च कारयेत्। अनेन दुर्जया रोगा वातजा यांति संक्ष
यं। शिरःके पादबस्तिनं सर्वकालेषु युज्यते। अथ कर्णपूरणं। स्वेदयेत्कर्णदेशं
तु किंचिच्च त्पार्श्वशायिनः। मूत्रैः स्नेहैः रसैः कोष्णैस्ततः श्रोत्रं प्रपूरयेत्। क

Marginal notes: कंभा — पिचुर्ध्वं — तिद्धिः (right); ...नदीपात... (left); कडयल = , वातजा यांति संक्षयं मूर्धन्य... (bottom)

शृंगवेरं च मधुं च सैंधवं तैलमेव च छि: =६

एषा छि: ईयिषं रिते स्त्रोत्रे तं पंचगुणानिवा । सहस्रैवापि मात्राणां श्रोत्रकंठशिरोगदा स्व
८९ जानुनः कर्णवर्तकुर्याच्छोटयोर्युतं । मात्रा मात्रा भवेत्काश्च सर्वत्रैव विनिश्चयः । रस
९१ धैः पूरणं कर्णे भोजनास्त्राक् प्रशस्यते । तैलाद्यैः पूरणं कर्णे भास्करे स्तमुपागते ।
कालीय तद्यथा । पीतार्कपत्रमाज्येन लिप्तं वह्नौ प्रतापयेत् । तद्रसः श्रवणे क्षिप्तः कर्णशूल
कराः-५ हरः परः । कालीमूलांतरे कोमं वत्समूत्रं ससैंधवं । निक्षिपेत्तेन प्राप्नोति शूल
पाकादिकारकः । शृंगवेरं च मधुकं कर्णे तैलमेव च । कटुकं कल्कयोर्दयमत वा
वेदनापहं । कपित्थमातुलुंगाम्लशृंगवेररसैः शुभैः । सुखोष्णैः पूरयेत्कर्णं कर्ण
शूलोपशांतये । अर्कांकुरानम्लपिष्टान्स्तैलाक्तान्लवणान्वितान् । संनिदध्या
त्स्नुही कांडे कोष्णे तैलं तदा हते । पुटपाकक्रमं छे रसैरसे स्तस्य प्रपूरयेत् । सुखो
ष्णे तेन प्राप्नोति कर्णपीडाः सुदारुणाः । महतः पंचमूलस्य कांडान्यष्टांगुलानि
तु । क्षौमेनावेष्ट्य संसिच्य तैलेनादीपयेत्ततः । यद्यत्तैलं च्यवते तेभ्यः सुखोष्णं ते ८९
न पूरयेत् । ज्ञेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनां । एवं स्याद्दीपिकातैलं कुर्वे
देवतरोस्तथा । तैलं स्नातामलेन मंदाग्नौ परिपाचितं । हरिद्रा मत्रिदोषे स्यो
कर्णमूलं प्रपूरणात् । कल्कीकाथेन यष्ट्याह्ला काकोली धान्यमाषकैः । शृंक

श्लेष्माभिस्यदनाशिनी =४

देचयेत्। अधिमंथेषु सर्वेषु ललाटे व्यधयेत्सिरां। अशांतेषु सर्वथा मंथेषु भ्रुवोरुपरि दाहयेत्। अभि
ष्यंदेषु सर्वेषु बध्नीयात्पिंडकां बुधः। वाताभिष्यंदशांत्यर्थं स्निग्धोष्णा पिंडका भवेत्। एरंडपत्रमूलत्वक्कृ नि
र्मिता वातनाशिनी। पित्ताभिष्यंदनाशाय धात्रीपिंडी सुखावहा। महानिंबदलोद्भूता पिंडी वा पित्तनाशि
नी। शिग्रुपत्रकृता पिंडी श्लेष्मपित्तहरा भवेत्। त्रिफलापिंडिका प्रोक्ता नाशने श्लेष्मपित्तयोः। पिच्छू
कोंजिकतोयेन नश्यत्यभिष्यंदपिंडिका। लोध्रस्य हरते शिग्रुमभिष्यंदमसृग्भवं। शुंठीनिंबदलैः पिंडी
सुखोष्णा स्वल्पसैंधवा। धार्या चक्षुषि संयोगात् शोथकंडूव्यथापहा। अथ बिडालकः। बिडालको ब
हिर्लेपो नेत्रपक्ष्मविवर्जितः। तस्य मात्रा परिज्ञेया सुखलेपविधानवत्। तथथा। यष्टी गैरिक सिंधूत्थ समुद्रफग =३
रसौंत =५ दार्वीतार्क्ष्यैः समांशकैः। जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः। रसांजनेन वा लेपः पथ्या बिल्वदलै
रपि। कुमारिकाग्निपत्रैर्वा दाडिमीपल्लवैरपि। वचा हरिद्रा विश्वैर्वा तथा नागरगैरिकैः। दग्ध्वा ससैंध
वैर्लोध्रं मधूच्छिष्टयुते घृते। पिष्टमंजनलेपाभ्यां सद्यो नेत्ररुजापहं। लोहस्य पात्रे संघृष्टो रसो निंब
फलोद्भवः। किंचिद्घनो बहिर्लेपात् नेत्रबाधां व्यपोहति। संचूर्ण्य मरिचां भृंगराजस्वरसं च मर्दये
त्। लेपनाद्दर्भिलोनाशं करोत्येष प्रयोगराट्। छिन्नभिन्ना विनिःसृत्य भमितल्लामंजननाभिकां। शिलो
धुमारिकाधर =२

लैल्लानं तु सिंधूत्थैः सद्रौद्रैः प्रतिसारयेत्। अथ तर्पणं। अथ तर्पणकं वक्ष्ये नेत्रतृप्तिकरं परं। यद्रूक्षं परि
रा. शुष्कं च नेत्रं कुटिलमाविलं। शीर्णपक्ष्मशिरोत्पातकृच्छ्रोन्मीलनसंयुतं। तिमिरार्जुनशुक्राद्यैरभिष्यंदाधि
९५ मंथकैः। शुष्काक्षिपाकशोथाभ्यां युतं वातविपर्ययैः। तन्नेत्रं तर्पणे योग्यं नेत्ररोगविशारदैः। दुर्दिनात्युष्ण
१५ शीतेषु चिंतायासभ्रमेषु च। अशांतोपद्रवे वाक्षिण तर्पणं न प्रशस्यते। वातातपरजोहीने देशे चोत्तानशा
यिनः। आधारौ माषचूर्णेन क्लिन्नेन परिमंडलौ। समौ दृढावसंबाधौ कर्तव्यौ नेत्रकोशयोः। पूरयेद्घृत
मंडेन विलीनेन सुखोदकैः। अथवा शतधौतेन सर्पिषा क्षीरजेन वा। निमग्नान्यक्षिपक्ष्माणि यावत्स्यु
स्तावदेव हि। धारयेन्मीलिते नेत्रे ततउन्मीलयेच्छनैः। धारयेद्वर्त्मरोगेषु वाङ्मात्राणां शतं बुधः। शु
क्ले कफे संधिरोगे मात्राः पंचशतं हिताः। कफे च षट्शतं कृष्णरोगे सप्तशतं हितं। दृष्टिरोगेष्टशतम
धिमंथे सहस्रकं। सहस्रं वातरोगेषु धार्यमेवं हि तर्पणं। स्विन्नेन यवपिष्टेन स्नेहवीर्यं ततस्ततः। य ९५
धूमपानेन हि:२ थास्वं धूमपानेन कफमस्य विरेचयेत्। एकाहं वा त्र्यहं वापि पंचाहं वेष्यते परं। तर्पणे तृप्तिलिंगानि ने
त्रस्येमानि भावयेत्। सुखस्वप्नावबोधत्वं वैशद्यं दृष्टिपाटवं। अहतिर्व्याधिशांतिश्च क्रियालाघवमेव राम:
च। अथ सात्म्यं गुरु स्निग्धं नेत्रं स्यादतितर्पणं। रूक्षमस्राविलं भुग्नं नेत्रं स्याद्धीनतर्पितं। रूक्षस्निग्धो

पचाराभ्यां नेत्रयोः स्यात्प्रतिक्रिया ॥ अथ पुटपाकः ॥ अतऊर्द्ध्वं प्रवक्ष्यामि पुटपाकप्रसाधनं ॥ द्वौ बिल्व
मात्रौ मांसस्य पिंडौ स्निग्धस्य पेषितौ ॥ द्रव्याणां बिल्वमात्रं तु द्रवाणां कुडवो मतः ॥ तदैकत्वं समालो
ड्य पत्रैः सुपरिवेष्टितं ॥ पुटपाकेन तत्स्वच्छं काश्मरीपात्रसंवृधः ॥ तर्पणोक्तविधानेन यथावदवचार
येत् ॥ हस्तिमध्योनिषेच्यः स्यान्नित्यमुक्तानशायिनः ॥ स्नेहनो लेखनीयश्च रोपणश्चेव स त्रिधा ॥ हितः
स्निग्धोतिरूक्षस्य स्निग्धस्यापि हि लेखनः ॥ दृष्टेर्बलार्थमितरः पित्तासृक्ब्रणवाततुत् ॥ सर्पिर्मां
सवसामज्जामेदः स्वाद्वौषधैः कृतः ॥ स्नेहनः पुटपाकश्च धार्यो द्वे वाक्शते हि सः ॥ जांगलानां यकृन्
मांसैर्लेखनद्रव्यसंयुतैः ॥ कृष्णलोहरजस्ताम्रशंखविद्रुमसिंधुजैः ॥ समुद्रफेनकासीसस्रोतोजदधि सीधाल न ३)
मस्तुभिः ॥ लेखनो वाक्शतं धार्यः तस्मात्ताद्विधारणं ॥ स्तन्यजांगलमध्वाज्यतिक्तकद्रव्यपाचितः ॥
लेखनत्रिगुणो धार्यः पुटपाकस्तु रोपणः ॥ वितरेत्तर्पणोक्तां तु क्रियां व्यापत्तिदर्शने ॥ अथांजनं ॥
अथ संपक्वदोषस्य प्राप्तमंजनमाचरेत् ॥ हेमंते शिशिरे चैव मध्याह्ने जनमिष्यते ॥ मध्याह्ने वापराह्णे वा स्वीके
ग्रीष्मे शरदि चेष्यते ॥ वर्षास्वनभ्रे नात्युष्णे वसंते च सदैव हि ॥ लेखनं रोपणं चैव तथा स्यात्स्नेहनांजनं ॥ वि

८९ लेखनं क्षारतीक्ष्णाम्लरसैरंजनमुच्यते। कषायतिक्तकटुकसस्नेहं रोपणं मतं। मधुरं स्नेहसंपन्न
शा. मंजनं च प्रसादनं। गुटिका रसचूर्णानि त्रिविधान्यंजनानि तु। कुर्यात् शलाकया तुल्या हीनानि च यथ
शार्ङ्गधर थोत्तरं। श्रांते प्ररुदिते भीते पीतमद्येन वज्वरे। अजीर्णे वेगघाते च नांजनं संप्रशस्यते। हरेणुमा
द्वि: त्रां कुर्वीत वर्त्तिं तीक्ष्णांजने भिषक्। प्रमाणं मध्यमो ध्यर्धं द्विगुणं तु मृदौ भवेत्। रसक्रिया तु तीक्ष्ण
९६ मा तु त्रिविडंगमिता हिता। मध्यमा द्विविडंगा स्याद्धीना चैकविडंगका। वैरेचनके चूर्णे तु द्विशला
कं विधीयते। मृदौ तु त्रिशलाकं स्यात्ततः स्नेहिकांजने मुखयोः कुंठिताम्लक्ष्णा शलाकाष्टां
गुलोन्मिता। अश्मजा धातुजा वा स्यात्कलायपरिमंडला। ताम्रलोहाश्मसंजाताः शलाका ले द्वितीय हिः
खने मताः। सुवर्णरजतोद्भूताः शलाकाः स्नेहने मताः। अंगुली च मृदुत्वेन कथिता रोपणेषु च।
सायं प्रातर्वांजनं स्यान्न तस्मेदा नैव कारयेत्। नातिशीतोष्णवाताभ्रवेलायां संप्रशस्यते। कृष्ण ८९ शमे:
भागादधः कुर्यादपांगं यावदंजनं। प्रथमवर्त्तिः। शंखनाभिर्विभीतस्य मज्जा पथ्या मनःशिला।
पिप्पली मरिचं कुष्टं वचा चेति समांशकं। छागक्षीरेण संपिष्य वर्तिं कुर्याद्यवोन्मितां। हरेणुमा

त्रीसं पिष्य जलैः कुर्यादथांजनं। तिमिरं मांसवृद्धिं च काचं पटलमर्बुदं। रात्र्यांधं वार्षिकं पुष्पं व
र्त्तिश्चन्द्रोदयांजयेत्। चंद्रोदयावर्त्तिः लेखिनी। पलाशपुष्पस्वरसैर्बहुशः परिभाविता। करंज
बीजवर्त्तिस्तु दृष्टेः पुष्पं विनाशयेत्। लेखिनीवर्त्तिका। समुद्रफेनसिंधूत्थशंखपद्माण्डवल्क
लैः। शिग्रुबीजयुतैर्वर्त्तिः शुक्रादीन् शस्त्रवल्लिखेत्। लेखनीवर्त्तिः। दंतैर्दंतिवराहोष्ट्र गोहया
जखरोद्भवैः। शंखमुक्तांभोधिफेनयुतैः सर्वैर्विचूर्णितैः। दंतिवर्त्तिः कृता शुक्रार्बुदनाशिनी। लेखिनी दंतिवर्त्तिः। नीलोत्पलं शिग्रुबीजं नागकेशरकं तथा। एतत्कल्कैः कृता वर्त्तिः
रतिनिद्रां निवारयेत्। लेखनीवर्त्तिः। अथ रोपणवर्त्तिः। तिलपुष्पाण्यशीतिः स्युः षष्टिः संख्याः
कणाः कणाः। जात्याः कुसुमपं चाशन्मरिचानि तु षोडश। सूक्ष्मपिष्टाजलैर्वर्त्तिः कृता कुसु
मकाभिधा। तिमिरार्जुनशुक्राणां नाशिनी मांसवृद्धिनुत्। एतस्याश्चांजने मात्रा प्रोक्ता सा द्विह
रेणुका। पिप्पलीकुसुमे वर्त्तिः। रसांजनं हरिद्रे द्वे मालती निंबपल्लवाः। गोशकृद्रससंयुक्ता
वर्त्तिर्नक्तांध्यनाशिनी। रोपणीवर्त्तिः। अथ स्नेहिनी वर्त्तिः। धात्र्यक्षपथ्याबीजानि एकद्वि

त्रिगुणा नितु। पिष्ट्वा वर्त्तिं जलेः कुर्याद् अंजनं छिद्दिरेण्णुकं। नेत्रश्रावं हरत्याशु वातरक्तरुजं तथा। स्नेहनी
वर्त्तिः। अथ पारसक्रिया। तुत्थं माक्षिकं सिंधूत्थं सितासारं खमनःशिला। गैरिकोदधिफेनं च मरिचं चे
ति चूर्णयेत्। संयुज्य मधुना कुर्याद् अंजनार्थं रसक्रिया। वर्त्मरोगानमेति मिरकाचमूलहरं परं। लेख मुक
नरसक्रिया। वटक्षीरेण संयुक्तो गुप्त्यः कर्पूर जोरजः। क्षिप्रमंजनतो हंति कुशमं तुद्दिमासिकोलले
खनीरसक्रिया। दोर्ड्राम्पलालसं घृष्टे मरिचैर्नेत्रमंजयेत्। अतिनिद्रासमं पातितमः सूर्योद
यादिवा। लेखनीरसक्रिया। जातीपुष्पं प्रवालं च मरिचं कटुकावचा। सैंधवं वत्समूत्रेण पिष्टं
तेनाक्ष्ण्यंजनं। लेखनीरसक्रिया। शिरीषबीजं गोमूत्रकृष्णामरिचसैंधवैः। अंजनं स्यात्प्रस्वा
धाय सरसोन शिलावचैः। लेखनीरसक्रिया। अथ रोपणरसक्रिया। दार्वीपटोलं मधुकं सनिं
बं पद्मकोत्पलैः। अपौंडरीकं चैतानि पचेत्तोये चतुर्गुणे। विपाच्य तैलं शेषं च वस्त्र तेनीत्वा पुनः प पाद छि
चेत्। शीते तस्मिन्मधुक्षिप्तो दघात्वा संशोधिका न्नरं। रसक्रियेयं सा दाहाह्लसुरक्तरोगरुजाहरः॥ रामः
रोपणीरसवर्त्तिः रसक्रिया। रसांजनं सर्जरसो जातीपुष्पं मनःशिला। समुद्रफेनं लवणं गैरि ७

कं मरिचानि चा। एतत्समांशं मधुनापिष्टाः सक्तिर्नवर्त्मनि। अंजनं क्लेदकंडूघ्नं पक्ष्मणां च प्ररोहणं।
गुडूचीस्वरसः कर्षः क्षौद्रं स्यान्माषकोन्मितं। सैंधवं क्षौद्रतुल्यं स्यात्सर्वमेकत्र मर्दयेत्। अंजयेन्न
यने तेन पिल्लार्मतिमिरं जयेत्। काचं कंडूं लिंगनाशं शुक्लकृष्णगतान्गदान्। रोपणीरसक्रिया। दु
ग्धेन कंडूं क्षौद्रेण नेत्रस्रावं च सर्पिषा। पुष्पं तैलेन तिमिरं कांजिकेन निशांधतां। पुनर्नवा जयेदाशु
भास्करस्तिमिरं यथा। रोपिणीरसक्रिया। वंबूलदलनिःक्वाथो लेहीभूतस्तदंजनात्। नेत्रस्रावो
भंजते वै मधुयुक्तान्न संशयः। रोपणीरसक्रिया। हिंगोलस्य फलं घृष्टा पानीयेन नेत्रमंजनं। चक्षुःस्रावो
पशांत्यर्थं कार्यमेतन्महौषधं। रोपणीरसक्रिया। अपस्नेहनिरसक्रिया। कुतकस्य फलं घृष्ट्वा मधुना निर्मली
नेत्रमंजयेत्। ईषत्कर्पूरसहितं स्यात्तेन नेत्रप्रसादनं। नेत्रप्रसादिनीरसक्रिया। सर्पिः क्षौद्रं चांजनं स्यात्
शिरोत्पातस्य भेषजं। स्नेहनीरसक्रिया। अथ चूर्णांजनं। दन्तोडुलक्रुशिलाकाचशंखचंदनसैंधवैः। द्र
व्यैरंजनयोगोयं पुष्पार्मादिविलेखनः। लेखनाचूर्णांजनं। कणाछागयकृन्मध्ये पक्त्वा नेत्रे प्रयोजि
तः। अचिराद्धंति नक्तांध्यं तद्वत्स क्षौद्रमूषणं। लेखनमंजनं। प्राणाणांई मरिचं चैव पिप्पल्यर्णवफेन
यो। शाणाइं सैंधवं शाणं नवसौवीरकांजनात्। पिष्टं सुसूक्ष्मं चित्रायां चूर्णांजनमिदं शुभं। कंडू

सिंजिता २ लोध्र = १

काचककैफात्तीनां मलानां च विशोधनं। लेखनमंजनं। शिलापारसैकं पिष्ट्वा मध्यगालीं च वारिणा। मक्षी
चात्तन्जोलं सर्वं त्यजेच्चूर्णमधोगतं। सुस्कंधनगोलं सर्वं सर्पिष्टीसंनिधं भवेत्। विचूर्ण भावयेत्सम्यक्
९८ त्रिवेलं त्रिफलारसैः। कर्षैरस्य रजस्तत्र दशमासेन निक्षिपेत्। अंजयेन्नयने तेन सर्वदोषहरं हितं।
96 सर्वरोगहरं चूर्णं चक्षुषोः सुखकारकः। मृदुचूर्णांजनं। अग्नितप्तं हि सौवीरं निषिंचेत्त्रिफलारसैः
सप्तवेलं तथा स्तन्यैः स्त्रीणां सिक्तं विचूर्णितं। अंजयेत्तेन नयने पक्ष्महं चक्षुषो हितं। सर्वान्नेत्रवि
कारांस्तु हन्यादेतन्न संशयः। प्रसादनचूर्णांजनं। त्रिफलाभृंगशुंठीनां रसैः सर्पिषा। गोमूत्रं मधु रसे
ध्वजाहीरैस्त्रिक्तो नागः प्रतापितः। नच्छेल्लाकोहरसैव सर्वान्नेत्रभवान्गदान्। एलाकाहरिस्व
सादिनीगतदोषमपेतास्त्वं पूर्वपतेसम्यग्भसाप्रसाल्याद्वि यथादोषकार्ये प्रत्यंजनं ततः तथा
निर्यातदोषे हि धावने संप्रयोजयेत्। प्रत्यंजनं तीक्ष्णमेतन्नेत्रचूर्णं प्रसादनं। सयथा। मुद्गना
गे कुते शुद्धं तुल्यं सूतं विनिक्षिपेत्। स्रोतोंजनं तयोस्तुल्यं सर्वमेकत्र चूर्णयेत्। दशमांसेन कर्पू रम:
रं तत्र क्षिनचूर्णं प्रदापयेत्। एतत्प्रत्यंजनं नेत्रे गदजिन्नयनामृतं। नयनामृतप्रसादनं चूर्णांजनं। ९८
जयपालमबां मज्जां भावयेन्निंबुकाद्रवैः। एकविंशतिवेलं तु ततो वर्तिं प्रकल्पयेत्। मनुष्यलालया

जमालगोटे की गुठली = १

ॐ क्ष्रीँ क्षौँ रीँ श्रौँ विष्णुरूपत्कपेनमः
ॐ नमो भगवति विष्णुशक्ते त्वमे
नां ॐ हर हर नय नय पच पच मथ
मथ उत्सादय दूरे कुरु स्वाहा हि
मवंतं गच्छ जीव सः सः सः चंद्रमंडल
गतोसि स्वाहा ॥ २ ॥

99

पं- ८४

99

८८ घृष्ट्वा ततो नेत्रं तयाञ्जयेत्। सर्पादष्टविषं जित्वा संजीवयति मानवं। विषहरावर्त्तिः॥ आयुर्वेदसमु

शा॰ द्रस्य गूढार्थमणिसंचयः। ख्यातः कैश्चिद्बुधैस्तैस्तु ह्येनानाविधसंहिता। किंचिदर्थं ततो नीत्वा

११ कृतेयं संहिता मया। कृपाकटाक्षविक्षेपमस्यां कुर्वंतिसाधकाः। विविधगदार्तिदरिद्रनाशनं

या हरिरमलीवकरोति योगरत्नैः। कविहृदये सुसरोजनिर्मले सुविलसतु शार्ङ्गधरस्य सं-

हितासा॥ ॥ॐ॥ इति श्रीदामोदरसूनुना शार्ङ्गधरेण विरचितायां संहितायां चिकित्सास्था-

ने नेत्रप्रसादकर्मविधिस्त्रयस्त्रिंशोऽध्यायः समाप्तः। तत्समाप्तौ समाप्तोऽयं ग्रंथराट्॥ शुभमस्तु

संवत् १८०१ चै॰ शुक्लसप्तम्यां भौमे लिखितोयं गणेशदत्तगोऽझैरनागरव्यासेन सामाचेद्रिणा॥

८८

राम:

शार्ङ्गधरस्य सूचीपत्राणादयः

वाकृष्णनागार्जुनीकाटौ ४२।१

कासे मरिचादिगुटिका ४३।१

गुल्मे शोथे आमलादिगुटी ४३।२

अजीर्णविषूचिकासर्पदष्टसन्नि-
पाते संजीवनीगुटी ४३।२

पीनसादौ व्योषादिगुटी ४३।२

आमादि प्रगुरुचतुष्टयगुटी ४३।२

अर्शस्सु वृद्धदारकादिमोदकः ४३।२

अर्शोहि सूरणपिंडी ४३।२

अर्शसि वृहत्सूरणमोदकः ४४।१

अर्शसि प्राणदागुटिका ४४।१

पांडुरोगादौ मंडूरवटिकः ४४।१

प्रमेहादौ चंद्रप्रभागुटिका ४४।२

गुल्मे कांकायनगुटी ४४।२

वातव्याधौ योगराजगुग्गुलुः ४५।१

वातरक्ते कैशोरगुग्गुलुः ४५।२

भगंदरादौ त्रिफलागुग्गुलुः ४५।२

प्रमेहे गोक्षुरादिगुग्गुलु ४६।१

कुष्ठादौ त्रिफलाभोदको गुग्गुलुः ४६।२

गंडमालादौ कांचनारगुग्गुलुः ४६।२

वीर्यवृद्धौ माषादिमोदकः ४६।२

श्वासादौ कंटकार्यवलेहः ४७।१

क्षीणे च्यवनप्राशो वलेहः ४७।२

उरःक्षताने कूष्मांडकावलेहः ४७।१

अर्शसि खंडसूरणावलेहः ४८।१

सर्वरोगे अगस्तिहरीतक्यवलेहः ४८।१

अर्शस्सु कुटजावलेहः ४८।२

अतीसारे कुटजाष्टकावलेहः ४८।२

क्षीणादौ क्षीरषट्पलकं घृतं ४८।२

ग्रहण्यादौ चांगेरी घृतं ४९।२

अतीसारे मसूराद्यं घृतं ४९।२

शुक्रदोषे कामदेव घृतं ५०।१

अपस्मारादौ पानीयकल्याणकं घृतं ५०।१

वातरक्ते अमृताद्यं घृतं ५०।१

वातरक्ते महातिक्तकं घृतं ५०।१

दद्रूपामाकुष्ठादौ कासीसाद्यं घृतं ५०।२

नाडीव्रणादौ जात्याद्यं घृतं ५०।२

उदररोगे नाभिलेपविरेचकं बिंदुघृतं ५१।१

नेत्ररोगे त्रैफलं घृतं ५१।१

विषहरं गौराद्यं घृतं ५१।१

शार्ङ्गधर १.८ चिकित्सा